# पञ्चमोध्यायः

## होराशास्त्रे नवांशस्य मीमांसा

## ५.१ पराशरीयषोडशवर्गेषु नवांशाय अत्यधिकं महत्वं किमर्थं प्रदत्तम् ?

प्रत्येकनवांशः तथा प्रत्येकनक्षत्रस्य एकचरणस्य सम्पूर्णः योगः ३° अंशाः २० कला च भवन्ति । अतः नवांशवर्गः षोडशवर्गेषु महत्वपूर्णः वर्तते । दक्षिणभारते कोऽपि ज्योतिर्विदः राशिवर्गस्याध्ययनं नवांशवर्गेण विना न करोति । बहवः ज्योतिर्विदाः नवांशवर्गं राशिवर्गात् अधिकः महत्वपूर्णंकथयन्ति, कारणं राशिवर्गे नीचस्थग्रहाः नवांशे उच्चस्थाः भवति, ते शुभफलशुभपरिणामदायकाः भवन्ति ।

सूर्यादिप्रत्येकग्रहाणामुच्चराशौ स्थिते सति उच्चनवांशः, नीचनवांशश्च भवन्ति तथा च नीचस्थितग्रहस्य नीचनवांशः उच्चनवांशश्च भवति । किन्तु तेषु चन्द्रः अपवादरूपेण दृश्यते । उच्चनवांशमीमांसाचन्द्रः वृषभराशौ उच्चस्थो भवति तस्मिन् राशौ वृषभराशिः चन्द्रस्योच्च राशिः भवति किन्तु चन्द्रस्य नीचनवांशः (राशिः वृश्चिकः) न भवति तद्वदेव वृश्चिकराशौ चन्द्रः नीचनवांशस्थो भवति किन्तु तस्मिन् स्थितौ चन्द्रस्य नीचनवांशो न भवति ।

## ५.२ नवमांशवैशिष्ट्यं महत्त्वं तथा फलनिरुपणम्

नभो मण्डले नक्षत्राणां ३६०० (अंशाः), समानद्वादशभागेषु विभक्ताः सन्ति । प्रत्येकभागस्य ३०० (अंशाः) भवन्ति तान् वयं राशी इत्युक्त्वा ज्ञायन्ते । नक्षत्राणां संख्या २७ (सप्तविंशतिः) सन्ति । प्रत्येकनक्षत्रे ३.२०० (अंशाः) तथा च प्रत्येकराशेः १३.२०० (अंशाः) भवन्ति । इत्थं सपादद्विनक्षत्रैः एका राशी भवति । अनन्तरं ३.२०० प्रभागस्यैकनवांशो भवति । अथवा नक्षत्रस्य चतुर्थांशोऽपि नवांशनाम्ना ज्ञायते । नवांशस्य विविधनामानि सन्ति । यथा- (नवमांशः, नवमासा, इअवा, नक्षत्रचरण, पाद, अंश, अङ्कन(३.२००) इत्यादि । अस्य प्रत्येकभागस्य मानं ३० (अंशाः) २०कलाः भवति । एकदशमांशः- ३०/१० अर्थात् ३ अंशस्य

भवति। मेष-सिंह-धनुराशिषु प्रथमो नवांशो मेषात्प्रारभ्यते, वृषकन्यामकरराशिषु प्रथमो नवांशो मकरात्प्रारभ्यते, मिथुनतुलाकुम्भराशिषु प्रथमोनवांशस्तुलातः प्रारभ्यते तथा च कर्कवृश्चिकमीनराशिषु प्रथमो नवांशः कर्कात्प्रारभ्यते । चरराशिनां प्रथमो नवांशः स्थिरराशीनां मध्यमो नवांश:, तथा च द्विस्वभावराशीनामन्तिमो नवांशो वर्गोत्तमनवांशः कथ्यते । "चरभे स्वस्मात्, स्थिरे नवमभात्, द्विस्वभावे पञ्चमभान्नवांशाः भवन्ति।" (प्रथमनवांश: धर्मनवांश: कथ्यते, द्वितीयनवांश: अर्थनवांश:, तृतीयनवांश: कामनवांश: तथा च चतुर्थनवांश: मोक्षनवांशरूपेण प्रसिद्धानि सन्ति)। (१-५-९ राशीनां नाम धर्मत्रिकोणं, २-६-१० राशीनां अर्थत्रिकोणं, ३-७-११ राशीनां कामत्रिकोणं तथा च ४-८-१२ राशीनां मोक्षत्रिकोणं नाम वर्तते।

- यः ग्रहः स्वगृहीभूत्वा स्वस्य नवमराशौ नवांशकुण्डल्यां भवति स: ग्रहः भाग्यांश(ओजमांश)युक्तो कथ्यते।
- यः ग्रहः स्वगृहीभूत्वा स्वोचनवांशे तिष्ठेत् सः उत्तमांशयुक्तो कथ्यते।
- यः ग्रहः स्वगृहीभूत्वा नीचनवांशस्थो भवति सः विकटांशयुक्तो कथ्यते ।

प्रत्येकग्रहस्यैकनवांशभोगकालः

- सूर्यः ३ दिनानि, ८ कला च भवति।

- चन्द्रः ६ कला, ३० विकला च भवति ।
- भौमः ४ दिनानि, १० कला, ३० विकला च भवति ।
- बुधः २ दिनं, ५ कला, ३० विकला भवति ।
- गुरुः एकमासः, १० दिनानि भवन्ति ।
- शुक्रः द्विदिवसः, १६ कला भवति ।
- शनिः त्रयो मासाः, दशदिनानि च भवन्ति ।
- राहु-केतुः द्विमासाः, द्विदिनानि भवन्ति ।

### ५.३ वर्गोत्तमनवांश:

स्वराशिषु स्वनवांश: वर्गोत्तमसंज्ञको भवति । अर्थात् यस्यां राशौ ग्रहः स्यात् नवांशेऽपि तद्राशावेव भवेत्तदा वर्गोत्तमीत्युच्यते ।“वर्गोत्तमाचरगृहादिषु पूर्वमध्यपर्यन्तगाः शुभफलानवभागसंज्ञा”[205]इति बृहज्जातकानुसारं चरराशिषु प्रथमनवांश:, स्थिरराशिषु पञ्चमनवांश:, द्विस्वभावराशिषु अन्तिमनवांश: वर्गोत्तमसंज्ञकोभवति। यथोक्तम्- “चरभवनेष्वाद्यंशाः स्थिरेषु मध्या द्विमूर्तिषु तथान्याः । वर्गोत्तमाः प्रदिष्टाः तेष्विह जाताः कुले मुख्याः ।।”[206] वर्गोत्तमे जन्म

[205] बृहज्जातकम्अ.-१, श्लो.-१४

[206] षडवर्गफलप्रकाशः, पृ. २

भाग्यशालितायाः सूचको मन्यते । वराहमिहिरेणाप्येवं स्वीकृतम् – “शुभंवर्गोत्तमे जन्म”[207]निम्नलिखितेष्वंशेषु ग्रहः वर्गोत्तमी भवति ।

मेषराशौ०.० अंशतः ३.२० पर्यन्तम्

वृषभराशौ १३.२० अंशतः १६.४० पर्यन्तम्

मिथुनराशौ २६.४० अंशतः ३०.०० पर्यन्तम्

कर्कराशौ ००.०० अंशतः ३.२० पर्यन्तम्

वर्गोत्तमसंज्ञकग्रहः उत्तमं शुभं च फलं प्रददाति । यथा- जन्मकाले चन्द्रः मेषराशौ तथा च नवांशेऽपि मेषस्थो भवेत् तदा सः वर्गोत्तमीत्युच्यते। तद्वदेव मेषराशौ सूर्यः उच्चस्थो भवति किन्तु स एव सूर्यः जन्मलग्ने एवञ्च नवांशेऽपि मेषस्थो भवेत् तदा अधिको बलवान् भवति अर्थात् सूर्यः उच्चवर्गोत्तमी भवति।शनिः वर्गोत्तमी भूत्वा मेषस्थो भवति तदा मेषराशी शनेः नीचराशी वर्तते तेन कारणेन शनिः नीचवर्गोत्तमी भवति । अन्ये ग्रहाः(चन्द्रः, बुधः, गुरुः, शुक्रः साधारणवर्गोत्तमी कथ्यन्ते) ।**“स्वनवांशका राशयो वर्गोत्तमाः ।”**[208]**“वर्गोत्तमा नवांशास्तथादिमध्यान्तगाश्चरादयेषु” ।**[209]**“वर्गोत्तमाचरगृहादिषु पूर्वमध्यपर्यन्तगाः शुभफलानवभागसंज्ञा”**[210]इति बृहज्जातकानुसारं चरराशिषु (मेष-कर्क-तुला-मकर) प्रथमनवांशः. स्थिरराशिषु (वृष-सिंह-वृश्चिक-कुम्भ) पञ्चमनवांशः,

---

207 षडवर्गफलप्रकाशः, पृ. २

208 षडवर्गफलप्रकाशः, पृ. २

209 सारावली अ.-३, श्लो.-१३

210 बृ.ज्जा. अ.-१, श्लो.-१४

द्विस्वभावराशिषु (मिथुन-कन्या-धनु-मीन) अन्तिमनवांश: वर्गोत्तमसंज्ञको भवति । यथोक्तम्

**चरभवनेष्वाद्यंशाः स्थिरेषु मध्या द्विमूर्तिषु तथान्याः ।**

**वर्गोत्तमाः प्रदिष्टाः तेष्विह जाताः कुले मुख्याः ।।**[211]

**वर्गोत्तमशचरग्रहादिषु पूर्वमध्य पर्यन्ततः शुभफला नवभागसंज्ञा ।**

**सिंहोवृषः प्रथमषष्ठहयाङ्गतौलि**

**कुम्भास्त्रिकोणभवनानि भवन्ति सूर्यात्।।**[212]

**भट्टोत्पलः**[213]**-** चरगृहादिषु यथासंख्यं आदिमध्यावसानतः ये नवभागाः सन्ति ते वर्गोत्तमसंज्ञा युक्ताः प्रधानवर्गोत्तमाः भवन्ति । अर्थात् चरेषु मेषकर्कतुलामकरेषु प्रथमो नवांशः वर्गोत्तमो भवति । स्थिरेषु वृषसिंहवृश्चिककुम्भेषु मध्यमः पञ्चमनवांशः वर्गोत्तम:, द्विस्वभावेषु मिथुनकन्याधन्विमीनेषु नवमो नवांशको वर्गोत्तमो भवति । तथा च यवनेश्वरः- स्वे स्वे गृहेषु स्वगृहांशकाः ये वर्गोत्तमास्ते यवनेनिरुक्ताः इति ।शुभफलानवभागसंज्ञा, ते च वर्गोत्तमाद्या नवभागसंज्ञा जन्मनि शुभफलदाः भवन्ति । वर्गोत्तमे जन्म भाग्यशालितायाः सूचको मन्यते । वराहमिहिरेणाप्येवं स्वीकृतम् – **'शुभं वर्गोत्तमे जन्म'** ।[214] तथा च सत्यः-

[211]जात.भू., पृ. १५

[212] बृहज्जातक-टीका, (वराहमिहिरः) हो.वि. १/१४

[213] बृहज्जातकम्, भट्टोत्पलटीका, पृ. २३

[214] बृ.ज्जा., अ.-२२, श्लो.-४

**चरभवनेष्वाद्यंशाः स्थिरेषु मध्यादिवन्मूर्तिषु तथान्त्याः ।**

**वर्गोत्तमाः प्रदिष्टास्तेष्विह जाताः कुले मुख्याः ।।**

**विशेषः-** अत्र हि शुभाशुभफलकथनार्थं वर्गोत्तममूलत्रिकोणसंज्ञाश्च कथिताः । तत्र ये राशयः ग्रहाणां पूर्वं कथिताः तेषां नवमांशः यस्मिन् तदीय राशौ समायाति सः तस्य वर्गोत्तम संज्ञा । तथा च यवनेश्वरः- "स्वे स्वे गृहेषु स्वगृहांशकाः ये वर्गोत्तमास्ते यवने निरुक्ताः" अत्र यवनेश्वरः नवमांशान् यवनेनिरुक्तान् कथयति । किन्तु पर्यालोचनेनेदमवलोक्यते यत् नक्षत्राणां चतुष्पादकल्पना एव यवनेः राशिषु प्रयुक्ताः, तेनेदमायाति यत् यवनेरपि भारतीयकल्पना परिगृहीताः । एवं फलितज्योतिषां न केवलं यवनानामेव परिकल्पना अपितु भारतीया अपि एतस्मिन् रहस्यमयफलादेशे विशिष्टं योगं विभाजितवन्तः । प्रतीयते यत् कश्चित् आरम्भिक्यः राश्यादिकल्पना भारतीयैः यवनेभ्यो एवोपलब्धः ।निम्नलिखितेष्वंशेषु ग्रहः वर्गोत्तमी भवति । यथा-

| | |
|---|---|
| मेषराशौ | ००-०० अंशतः- ३.-२० पर्यन्तम् |
| वृषभराशौ | १३-२० अंशतः- १६-४० पर्यन्तम् |
| मिथुनराशौ | २६-४० अंशतः- ३०-०० पर्यन्तम् |
| कर्कराशौ | ००.०० अंशतः- ३-२० पर्यन्तम् |

उदितनवांशः वर्गोत्तमी एवं च शुभराशीयुक्तः स्यात् तदा शुभवर्गोत्तमनवांश: कथ्यते। यथा-

राशीः- २ ३ ४ ६ ७ ९ १२

नवांशः- २ ३ ४ ६ ७ ९ १२

तद्वदेव उदितनवांशः वर्गोत्तमी किन्तु अशुभग्रहराशेः स्यात् तदा पापवर्गोत्तमी कथ्यते । यथा-

राशीः- १ ५ ८ १० ११

नवांशः- १५ ८ १० ११

## ५.३.१ नवांशेवर्गोत्तमग्रह-भावयोः महत्त्वम्

बहुधा दृश्यते यत् कस्यापि जन्मकुण्डल्यां विशिष्टराजयोगे सत्यपि जीवने कष्टाधिकं दरीदृश्यते, तद्वदेव कुत्रचित् दृश्यते यत् जन्मकुण्डल्यामधिकग्रहाः नीचस्थाः वा निर्बलाः भवन्ति तथापि जातकः भाग्ययुक्तो दृश्यते, तस्य कारणमेकमेव भवति नवांशगतग्रहाणां स्थितिः । कारणं यत् फलादेशे नवांशकुण्डल्याः वर्गोत्तमग्रहाणां च विशेषमहत्त्ववशात्उपर्युक्तफलेषु भिन्नत्वं समागच्छति। अयमेव नवांशकुण्डल्याः महत्त्वं प्रतिपादयति । अर्थात् नवांशकुण्डलीं विना फलादेशकथनं खञ्जनस्य (एक पादरहितस्य) गमनसदृशमेवास्ति। कारणं यत् विशिष्टफलविचारे जन्मकुण्डल्यादधिकं महत्त्वं नवांशकुण्डली धारयति । तद्यथा- "स्वोच्चे नीचांशके दुःखी नीचे स्वोच्चांशके सुखी । स्वांशे वर्गोत्तमे भोगी राजयोगी भविष्यति ।।"

यथा- जन्मकुण्डल्याः कोऽपि ग्रहः स्वोच्चराशौ किन्तु स एव ग्रहः नवांशे नीचस्थो स्यात्तदा राशिगतोच्चस्थानस्य फलं निरर्थकं भवति । कारणं यत्

नवांशस्थितिमवलोक्यसः ग्रहः नीचस्थो एव भवति । तद्विपरीते सति विपरीतं फलमर्थान्नीचत्वभङ्गयोगो जायते उत्पद्यते वा ।

नवांशस्य वैशिष्ट्यमस्ति यत् कोऽपि ग्रहः जन्मकुण्डल्यां नीचस्थो भवति तथा च नवांशेऽपि नीचस्थो भवेत् तदा सः ग्रहः वर्गोत्तमीत्युच्यते। वर्गोत्तमग्रहः वर्गोत्तमस्थितिवशादशुभं फलं नापितु शुभं फलमेव प्रददाति, अर्थात् तस्य ग्रहस्य राशिगतनीचस्थितिः लुप्ततामवाप्नोति। इत्थमेव कोऽपि ग्रहः शत्रुक्षेत्रवर्ती भवेत् किन्तु नवांशकुण्डल्यामपि तस्मिन्नेवस्थितौ स्यात्तदा सः ग्रहः वर्गोत्तमी स्वक्षेत्री चोच्यते अतः शुभं फलं प्रददाति स: ग्रहः ।

चन्द्रस्य गुरोश्च वर्गोत्तमत्वं राजयोगप्रदं कथितमस्ति। शुक्रोऽपि वर्गोत्तमो भवेत् तदा सोऽपि उत्तमभाग्ययोगं कारयति । वर्गोत्तमलग्नगतचन्द्रमा वा स्वनवांशगतचन्द्रमाशुभःसौभाग्यप्रद: च कथितः। तद्वदेवशुभग्रहाः पापग्रहाः वा वर्गोत्तमस्थितौ शुभं फलमेव प्रददन्ति । वर्गोत्तमलग्नेशो यदि वक्री भूत्वा आत्मकारकेण ग्रहेण योगकारको भवतितदाऽधिकोबलशाली श्रेयस्करश्च ज्ञातव्यः । इत्थं ग्रहस्थितिमवलोक्य भविष्यकथने आश्चर्ययुक्तं फलं कर्तुं प्रभवति दैवज्ञः ।

### ५.३.२ फलितज्योतिषे नवांशस्य महत्ता

ज्योतिषशास्त्रे नवांशस्य महत्त्वं स्वर्णकारस्य कसौटीतुल्यमस्ति, स्वर्णकारः कसौटिरूपरि सुवर्णस्य सत्यतायाः परीक्षणं करोति तद्वदेव दैवज्ञः नवांशगतग्रहस्थिते: गम्भीरमध्ययनं कृत्वा ग्रहाणां वास्तविकं बलाबलं च ज्ञात्वा कुण्डलीशक्तेः ज्ञानमवाप्नोति। कोऽपि शुभाशुभयोगः जन्मकुण्डल्यापेक्षयानवां-शकुण्डल्यां शुभस्थानस्थितिः शुभं फलं तथा चाशुभस्थानस्थितिरशुभफलं प्रददाति । कोऽपि योग्यो ज्योतिर्विद: ग्रहफलनिर्णयावासरे नवांशस्योपेक्षां नैव करोति ।

ध्यातव्यं यत्- राजयोगकारकग्रहो नवांशे नीचादिदोषयुक्तो भवेत् तदा प्रबलराजयोगोऽपि निष्फलतामवाप्नोति, तद्विपरीतं यदि जन्मकुण्डल्यां ग्रहो दोषकारको भवेत् किन्तु नवांशकुण्डल्यां स एव ग्रहो बलयुक्तो वा शुभस्थानयुक्तो स्यात्तदा जातकः शुभं फलमवाप्नोति। इत्थं नवांशकुण्डली वास्तविकदृष्ट्या जन्मकुण्डल्याः मेरुदण्डरूपेण वर्तते ।जन्मकुण्डल्यां प्रबलग्रहोऽपि यदि नवांशकुण्डल्यां नीचांशवशात् ग्रहो निर्बलो भवेत् तदा जातकः उन्नतिं नैवाप्नोति ।

जन्मकुण्डल्यां यदि लग्नं 'पुरुषलग्नं' भवति तदा प्रायः नवांशेऽपिपुरुषलग्नमेव भवति । जातकस्य शुभाशुभफलज्ञानाय विवेचनकाले ग्रहाणां प्रत्येकभावानामुपरि एवं च तद्भावगतग्रहैः सह दृष्टिसम्बन्धस्य ध्यानं नितान्तमावश्यकं भवति । पाश्चात्यज्योतिषे यत्र दशापद्धतेःज्ञानं नास्ति तत्र ग्रहाणां दृष्टिमधिकं महत्त्वं प्रतिपादितम्। पाश्चात्यानां मतानुसारेण ग्रहाणां दृष्टयः, योगः, प्रतियोगाः वा दृष्ट्वा विद्वज्जनाः भविष्यकथनं कुर्वन्ति ।

नवांशस्यार्थो भवति ४० अंशानां(अथवा तैः गुणितः) दृष्टिः, पाश्चात्यां तां 'नोनाइल-दृष्टिं) कथयन्ति। सिद्धान्तेनानेन यः ग्रहः परस्परं ४०,८०,१२०,१६०,२००,२४०,२८० अंशपरिमितं दूरे भवन्ति ते एकैव नवांशे तिष्ठन्ति । नवांशकुण्डल्यां यदा ग्रहः अन्यग्रहेण सह युतिं करोति तदा तस्यार्थो भवति यत् सः जन्मकुण्डल्यां ४० अंशोपरि अथवा नवांश: गुणितदृष्ट्या परस्परमवलोकयतः इति । नवांशस्य समान्योऽर्थो भवति नवमभागः अर्थात् राशयः ३६० अंशानां १/९तमभागः यः ४० अंशपरिमितो भवति । पाश्चात्या अपि उपर्युक्तदृष्टिमहत्त्वं स्वीकुर्वन्ति । यद्यपि भारतीयज्योतिर्विदः सप्तवर्गदृष्ट्या अध्ययनं कुर्वन्ति किन्तु पाश्चात्याः केवलं जन्मकुण्डलीं दृष्ट्वैव शुभाशुभफलनिर्देशं

कुर्वन्ति, अयमेव भेदोऽस्ति पाश्चात्यज्योतिष-भारतीयज्योतिषयोर्मध्ये इति ।नवांशाऽऽधारेण नवनवांशलग्नफलम्-

**पिशुनश्चपलो धृष्टः पापकर्मरथ सदा ।**

**परेषां वयसनासक्तश्चौरश्च प्रथमांशके ।।**

**धार्मिकः सत्यवादी च नानाशास्त्रविशारदः ।**

**दृढव्रतो महोत्साही द्वितीयांशे भवेन्नरः ।।**

**उत्पन्नविभवो भोक्ता संग्रामे विगतस्पृहः ।**

**गान्धर्वप्रमदासक्तस्तृतीयांशकसम्भवः ।।**

**चतुरंशकजातं स्मरणाद्वीक्षणादपि ।**

**सर्वस्वं संग्रहे नित्यं यत्किञ्चिद्दिविभूतले ।।**

**सर्वलक्षणसम्पन्नो धनी भवति सर्वतः ।**

**दीर्घायुर्बहुपुत्रश्च यो जातः पञ्चमांशके ।**

**स्त्रीनिर्जितोऽनपत्यश्च बहुमायो नपुंसकः ।**

**दृढवैरो महोत्साहो जातः षष्ठे नवांशके ।।**

**विक्रान्तो मतीमान् शूरः संग्रामे वा पराजितः ।**

**दृढबुद्धिर्महोत्साहो यो जातः सप्तमांशके ।।**

**स्वधर्मकुशलो दक्षः सिञ्चितात्मा जितेन्द्रियः ।**

**भृत्यानां पोषणे दक्षा यो जातश्चाष्टमांशके ।।**

**अष्टमांशकजातस्य ये गुणाः संप्रकीर्तिताः**

**नवमेंशे प्रजातस्य त एव कथिताः बुधैः ।।**[215]

## ५.४ विवाहे नवांशस्य भूमिका (Role of Navansh in A Marriage)

सामान्यतः जन्मकुण्डल्यां नवमभावः भाग्यभावरूपेण प्रसिद्धो वर्तते, किन्तु भाग्यस्य भाग्यफलहेतवे नवांशकुण्डल्याः आवश्यकता भवति। नवांशकुण्डल्योपरि दृष्टिं विना योग्यज्योतिर्विदः भविष्यकथनं नैव करोति । कारणं यत् ग्रहाणां बलाबलज्ञानं नवांशकुण्डल्या एव ज्ञातुं शक्यते ।लग्नकुण्डल्यां बलवान् किन्तु नवांशकुण्डल्यां निर्बलः ग्रहः भवति तदा तस्य सम्पूर्णफलप्राप्तये संशयो भवति। अतएव भविष्यकथने नवांशस्यावश्यता कथिता । नवांशकुण्डली आधारेण स्त्रीस्वभावस्य, तस्याचरणस्यतथा च सुख-दुःखादीनां विचारः क्रियते। यथा-

1. नवांशस्याधिपतिः भौमो स्यात्तदा जातकस्य स्त्री क्रूरा हीनाचरणयुक्ता च भवति।
2. नवांशस्याधिपतिः सूर्यो स्यात्तदा स्त्री पातिव्रतयुक्ता किन्तु उग्रप्रकृतियुक्ता भवति।
3. नवांशस्याधिपतिः चन्द्रः स्यात्तदा शान्ता, रूपवती च नारी भवति।
4. नवांशस्याधिपतिः बुधः स्यात्तदा सुन्दरी चातुर्ययुक्ता च स्त्री भवति।
5. नवांशस्याधिपतिः गुरुः स्यात्तदा सदाचारयुक्ता, तीर्थाटनकर्मणि रता, व्रताचरणयुक्ता च स्त्री भवति।

---

215 षडवर्गफलप्रकाशः, पृ. ४४-४५, लग्नगतनवांशफले विशेषः, श्लो.-१६-२४

6. नवांशस्याधिपतिः शुक्रः स्यात्तदा शृङ्गारप्रिया, चातुर्ययुक्ता, भोगविलासप्रवीणाच भवति किन्तु आचारहीना भवितुं शक्यते ।

7. नवांशस्याधिपतिः शनिः स्यात्तदाक्रूरस्वभावयुक्ता, दुष्टा, कुटिला, भर्तृविरुद्धाचरणयुक्ता च स्त्री भवति ।

यदि नवंशाधिपति: व्ययस्थाने भवति तादा जातकः स्त्रीकारणेन असंतुष्टो भवति । यदि नवांशाधिपतिः पापग्रहो, पापग्रहयुक्तो वा पापग्रहदृष्ट: स्यात्तदा स्त्री कलहप्रिया भवति, किन्तुशुभग्रहयुक्तःवा दृष्टः स्यात्तदा वा स्वोच्चराशौ, केन्द्रे वा त्रिकोणे भवेत् तदा जातकः सम्पूर्णं स्त्रीसुखमवाप्यते। यदि नवांशेशः पापग्रहेणयुक्तो वा दृष्टो भवेत् तदा पापग्रहसंख्यातुल्य स्त्रीणां विनाशः वा सम्बन्धविच्छेदो भवति (स्त्रीकुण्डल्यामपि तद्वदेव पतिसौख्यसम्बन्धिफलं कथनीयम्)। नवांशाधिपतिः लग्नाद्द्वितीये भवति तादा विवाहानान्तरं धनमवाप्नोति जातकः । नवांशाधिपतिः जन्मकुण्डल्यां षष्ठाष्टमस्थाने स्यात्तदा स्त्रीवियोगः कथनीयः । जन्मलग्नेशः यस्मिन् स्थाने भवेत् तत्रस्थनवांशाधिपतेः गृहे वा गोचरे गुरुः भ्रमणं करोति तदा स्त्रीलाभो वक्यतव्यः । लग्नेशः शत्रुस्थाने नीचनवांशे च भवेत् तदा स्त्रीहानिः वा विवाहबाधा उत्पद्यते ।

**५.५ नवांशलग्ने ग्रहफलम् :-**

- सूर्यस्य नवांशे जातकः समशरीरयुक्त:, गौरवर्ण:, गम्भीर:, तेजोयुक्त:, प्रेमकर्मणि कुशलः, साहसी, चञ्चलः, धनवान्, धर्मे रतियुक्त:, क्रूर:, शत्रुहन्ता च भवति । तदुपरि सूर्यनवांशेन जातकः दुर्जनविजेता, दुष्टस्वभावयुक्त:, वक्रस्वभावयुक्तश्च कथितः । “लग्नस्य भागे नवमे विवस्वान् नरं प्रसूते विजितं खलश्च । नीचानुरक्तं वृजिनैः समेतं जिह्मस्वभावं सततं विशीलम्।।” “भवति

कनककान्तिर्नातिर्दीर्घो न खर्वः प्रविरलतनुरोमा वासवेषः सुदृष्टिः । बहुधनपरिपूर्णो धर्मशीलो गुणज्ञो विषयसुखसुवेशः शीतरश्मेर्नवांशे।।[216]

- चन्द्रनवांशे सति जातकः स्वर्णकान्तियुक्तः, मध्यमशरीरधारी, सुदृष्टियुक्तः, धनेन पूर्णः, धर्माचरणयुक्तः, कृष्या जलेन वा धनवान्, अतिथिप्रियः, पुत्रसुखयुक्तः, सर्वप्रियः, कुनखी,विषयभोगी च भवति । "नवांशको रात्रिपतेर्विलग्ने करोति मर्त्यंबहुशो धनाढ्यंकृष्याप्तवित्तं सुतसौख्ययुक्तं प्रियातिथिं सर्वजनप्रियञ्च ।।" " केशाग्रेकपिलः सुवृत्तनयनः पृष्ठेर्नकिंचित्तनौ गौराङ्गः कुनखी व्रणोङ्कितशिरा कामी बली मत्सरी । धूर्तः स्त्रीधनसंग्रहेऽतिकृपणः स्याद्भूमिजांशे नरः ।।[217]

- भौमनवांशे जन्मः भवति तदा स्वर्णसदृशकेशयुक्तः, गौरवर्णः, व्रणयुक्तः, कामी, बलवान्, द्वेषी, धूर्तः, धनसंग्रहकारकः, क्रूरः, लोभी, पित्तज्वरपीडितः, नेत्ररोगी, प्रतापहीनः च भवति । "नवांशको भूतनयस्य लग्ने करोति मर्त्यं बहुदुःखयुक्तम्। पित्तज्वरासृक्परिपीडिताङ्गं प्रतापहीनं सततं कुचैलम्।।" "श्यामश्चञ्चललोचनःसमतनुविस्तीर्णवक्षस्थलो दीर्घाकुञ्चितमूर्धजो-ऽपिदशनश्रोणीभिराशोभितः। शीर्णश्चक्रयविक्रयेषु कुशलो धीरोधनाढ्य: सुखीदिव्यस्त्र्यम्बरमाल्यभूषणरतः स्याच्चन्द्रजांशे नरः ।।"[218]

- बुधनवांशे जन्मे सति जातकः श्यामवर्णयुक्तः, चञ्चलनेत्रयुक्तः, दीर्घवक्षस्थलधारी, व्यापारे क्रय-विक्रयकर्मणि कुशलः, धैर्यवान्, धनवान्, सर्वसुखसम्पन्नः, विवेकशीलः, पण्डितः, स्वल्पशत्रुयुक्तः, आभूषणप्रियश्च भवति । "लग्ने नवांश: शशिनन्दनस्य करोति मर्त्यं बहुवित्तयुक्तम्। मेधाविनं सर्वसुखाधिभाजं विवेकिनं पण्डितमल्पवैरम्।।" "श्यामाङ्गकमलोदरः सुवदनो नीलोत्पलाभेक्षणः

---

216 षडवर्गफलप्रकाशः, पृ. ४४, लग्नगतनवांशफले विशेषः, श्लो.-४,५

217 षडवर्गफलप्रकाशः, पृ. ४४, लग्नगतनवांशफले विशेषः, श्लो.-६,७

218 षडवर्गफलप्रकाशः, पृ. ४४, लग्नगतनवांशफले विशेषः, श्लो.-८,९

प्रांशुः शोभनमूर्द्धजोऽति विमलः पाणौ सुरेखाङ्किततः । बुद्धीशो ह्यतिथिप्रियो बहुगुणः शूरोङ्गनावल्लभो वित्ताढ्यो मधुरस्वरः सुरगुरोरंशे भवन्मानवः ।।"[219]

- गुरोः नवांशे जन्मः स्यात्तदा जातकः सुगठितदेहयुक्तः, नीलाक्षिवान्, बुद्धिमान्, गुणवान्, अतिथिप्रियः, स्त्रीणां प्रियः, मधुरभाषी, पुत्रवान्, धनवान्, गीत-सङ्गीतनिपुणः, मानवेषु पूज्यश्च भवति । "नवांशके देवपुरोहितस्य लग्ने विधत्ते सुतवित्तसौख्यम्। करोति गीते निपुणं मनुष्यं सदा नराणां कुरुतेच पूज्यम्।।" "रक्तोपान्तोऽनयसितनयनो मञ्जुकेशः सुमूर्तः कम्बुग्रीवो भवति विकलः श्यामवर्णः सुनाभिः । शूरः श्रीमान्सुशीलः कविरतिसधनो दानशीलो गुणज्ञः वस्त्रालङ्कारतुष्टः सुकुसुमनिरतो मानवो भार्गवांशे।।"[220]

- शुक्रस्य नवांशे जन्मः स्यात्तदा जातकः सुन्दरनेत्रयुक्तः, व्याकुलचित्तयुक्तः, सुशीलः, कविः, दानशीलः, वस्त्रालङ्कारेण सन्तुष्टः, मृदु, बहुपुत्रवान्, गुणवान्, समृद्धियुक्तः च भवति । "नवांशको भार्गवनन्दनस्य लग्ने विधत्ते बहुपुत्रभोगान्। सुरूपचेष्टं गुणिनं समृद्धं दिव्याङ्गनाभोगसुखं सदैव ।।" "प्रविरलतनुशोभा बभ्रुकेशः कृशाङ्गो भवति ललितनेत्रः श्यामवर्णः स्वतन्त्रः । बहुगुणपरिपूर्णो पापशीलो विधर्मा परिमितधनभागी मानवो भानुजांशे।।"[221]

- शनेः नवांशे जन्मः स्यात्तदा जातकः श्यामवर्णः, दुर्बलशरीरवान्, नैकगुणैः पूर्णः, पापाचरणयुक्तः, धर्मेणविमुखः, सीमितधनसुखभोगी, बहुभूमिनाशकः, न्यायकर्मणि उग्रश्च भवति । "नवांशकः सूर्यसुतस्य लग्ने नृणां विधत्ते बहु भूमिनाशम्। अर्थक्षयं न्यायमनन्तमुग्रं प्रपोषणं चौरक्षतं सदैव ।।"[222]

---

219 षडवर्गफलप्रकाशः, पृ. ४४, लग्नगतनवांशफले विशेषः, श्लो.-१०, ११

220 षडवर्गफलप्रकाशः, पृ. ४४, नवांशफलविचारः, श्लो.-१२,१३

221 षडवर्गफलप्रकाशः, पृ. ४४, नवांशफलविचारः, श्लो.-१४,१५

222 षडवर्गफलप्रकाशः, पृ. ४४, नवांशफलविचारः, श्लो.-१६

## ५.६ नवांशराशिफलम्

### ५.६.१ मेषनवांश:

- मेषस्य प्रथमनवांशे मध्यमशरीरम्, लघुनासिका, मेषसदृशं मुखम्, कर्कशवाणी, सङ्कुचितनेत्रौ, कृशः, नष्टाङ्गयुक्तश्च भवति ।
- मेषस्य द्वितीये नवांशे जातकः श्यामवर्णः, दीर्घभुजावान्, दीर्घनासिका, मधुरभाषी च भवति ।
- मेषस्य तृतीयनवांशे श्याम तथा च वक्राकारकेशयुक्तः, सुन्दरनेत्रयुक्तः, वाक्पटु, गौरवर्णः,कृशनितम्बयुक्तश्च भवति ।
- मेषस्य चतुर्थे नवांशे व्याकुलः, लघुकदयुक्तः, साहसी, नृत्यकः, भ्रमणशीलः, भ्रातृविहीनश्च भवति ।
- मेषस्य पञ्चमनवांशे जातकः अहङ्कारयुक्तः, सिंहसमाननेत्रयुक्तः, दीर्घमुखं, दीर्घनासिका, सन्मुखभागेदीर्घशरीरम्, धनवांश्च भवति ।
- मेषस्य षष्ठनवांशे श्यामवर्णः, मृगसमाननेत्रयुक्तः,कृशकटियुक्तः, दीर्घोदरयुक्तः, भययुक्तः, वाचालश्च भवति ।
- मेषस्य सप्तमनवांशे चञ्चलनेत्रयुक्तः, धवलः,कुलटायाः भर्ता, घातकी, दीर्घशरीरयुक्तश्च भवति ।
- मेषस्य अष्टमनवांशेकपिसदृशमुखम्, गुप्तरोगी, हिंसकः, असत्यवक्ता, घातादिरोगयुक्तः, मित्रैः साकं सद्व्यवहारवान् च भवति ।
- मेषस्य नवमनवांशे जातकः दीर्घतनयुक्तः, कृशः, यात्राप्रियः, दीर्घकर्णयुक्तः, अश्वसदृशमुखं, बहुरूपधारी, निर्ममः, निर्दयी च भवति ।

### ५.६.२ वृषभनवांश:

➢ वृषभस्य प्रथमनवांशे जातकः श्यामवर्णः, साहसी, नीचप्रकृतियुक्तः, विषमनेत्रदृष्टियुक्तः, प्रकृतिविरुद्धाचरणयुक्तश्च भवति ।

➢ वृषभस्य द्वितीयनवांशे वक्रमुखयुक्तः, गम्भीरः, आत्मनिद्रवितः, अल्पबुद्धियुक्तः, प्रतिकूलकर्म कर्ता, असत्यभाषी, वाचालश्च भवति ।

➢ वृषभस्य तृतीयनवांशेकोमलाङ्गयुक्तः, सुन्दरशरीरयुक्तः, दीर्घनेत्रयुक्तः, धर्मयज्ञादिकर्मणि श्रद्धावान्, स्व-परिवारस्यपोषकश्च भवति ।

➢ वृषभस्य चतुर्थनवांशे लघुकायः, पिङ्गलः, उदारः, क्रोधी, विलासी,धनवान्, परधनहर्ता च भवति ।

➢ वृषभस्य पञ्चमनवांशे जातकः महिषसदृशमुखयुक्तः,अतिकेशयुक्तः, विलासी, बृहद् भुजायुक्तः, दीर्घस्कन्धौ च भवतः ।

➢ वृषभस्य षष्ठनवांशे जातकः दीर्घनेत्रयुक्तः, मृदुशरीरवान्, मोहकवाचायुक्तः, माधुर्ये हास्यरसे च प्रवृत्तः, कृशः, वाचालः, कर्मणि निपुणश्च भवति ।

➢ वृषभस्य सप्तमनवांशे विशालनेत्रयुक्तः, दीर्घाङ्गधारी, स्वजनैः सह द्वेषकर्ता, वामाङ्गिनीषु रतः, अल्पकेशयुक्तश्च भवति ।

➢ वृषभस्य अष्टमनवांशे जातकः व्याघ्रसमाननेत्रयुक्तः, दाडिमसदृशदन्तपङ्क्तियुक्तः, अल्पकर्मी, अहङ्कारयुक्तः, वाचालश्च भवति ।

➢ वृषभस्य नवमनवांशे जातकः सम्माननीयः, अल्पसाहसयुक्तः, क्रोधी, भीतः, कृशः, द्युतकर्मप्रियः, धनसञ्चयकर्ता, कुण्ठाग्रस्तः, प्रलापी च भवति ।

### ५.६.३ मिथुननवांश:

➢ मिथुनस्य प्रथमनवांशे जातकः दीर्घश्मश्रुवान्, दीर्घस्कन्धयुक्तः, मयूरसमाननेत्रयुक्तः, उच्चनासिकायुक्तः, कृशास्थिवान्, श्यामवर्णः, कृश-हस्तयुक्तश्च भवति ।

➢ मिथुनस्य द्वितीयनवांशे घटसदृशशिरयुक्तः, धार्मिकः, वाचालः, क्रियाशीलः, हिंसकः, सेनापति च भवति ।

➢ मिथुनस्य तृतीय नवांशे गौरवर्णः, रक्तनेत्रयुक्तः, समशरीरः, बुद्धिमान्, लम्बमुखयुक्तः, तीव्रभ्रमरयुक्तः, प्रभावी, चतुरश्च भवति ।

➢ मिथुनस्य चतुर्थनवांशे जातकः कृशतनयुक्तः, सुन्दरनेत्रयुक्तः, दीर्घललाटं, दीर्घवक्षस्थलयुक्तः, सुन्दरं मुखं, मृदुवाणीयुक्तश्च भवति ।

➢ मिथुनस्य पञ्चमनवांशे दीर्घमुखयुक्तः, दीर्घवक्षस्थलयुक्तः, समबलिष्टशरीरयुक्तः, दुष्टः, कपतयुक्तश्च भवति ।

➢ मिथुनस्य षष्ठनवांशेमादकनयनयुक्तः, दीर्घललाटं, द्युतकर्मणिनिपुणः, पीतदन्तयुक्तः, निरर्थकप्रलापी च भवति ।

➢ मिथुनस्य सप्तमनवांशे ताम्रवर्णः, अरुणः समुन्नतनेत्रयुक्तश्च, विशालवक्षस्थलयुक्तः, सिक्षायां कलायाञ्च निपुणः(दक्षः) हास्यपूर्णस्वभावयुक्तश्च भवति ।

➢ मिथुनस्य अष्टमनवांशे श्यामवर्णः, मनस्वी, सुन्दरभाषी, कलाविदश्च भवति ।

➢ मिथुनस्य नवमनवांशे जातकः गोलाकारश्वेतनेत्रयुक्तः, सुन्दरशरीरयुक्तः, निपुणः, मेधावी, रतिकर्मणिनिपुणः, कला-साहित्य-विज्ञान-काव्यानां च ज्ञाता भवति ।

### ५.६.४ कर्कनवांश:

- कर्कस्य प्रथमनवांशे जातकः गौरवर्णयुक्तः, दीर्घोदरयुक्तः, दिव्याभायुक्तः, दीर्घनेत्रयुक्तः, सुन्दरकेशयुक्तश्च भवति ।

- कर्कस्य द्वितीयनवांशे रक्तकान्तियुक्तः, विवाहार्थं दीर्घकालपर्यन्तप्रयत्नरतः, भारवाहकः, कलाप्रियः, मार्जारसदृशमुखयुक्तश्च भवति।

- कर्कस्यतृतीयनवांशे गौरवर्णः, सुकुमारः, मृदुदेहयुक्तः, बुद्धिमान्, मधुरभाषी, आलस्यपूर्णः किन्तु प्रभावी वक्ता च भवति ।

- कर्कस्य चतुर्थनवांशे श्यामवर्णः, धनुषाकारभ्रमरयुक्तः, विलासितापूर्णः, सुन्दरनेत्रयुक्तः, स्थूलशरीरवान्, क्षीणभाग्ययुक्तः, बन्धुहितकारी च भवति ।

- कर्कस्य पञ्चमनवांशे वक्रभ्रमरयुक्तः, दीर्घभुजा, अल्पबुद्धियुक्तः, सेवारतः, दुष्कर्मी, असहनशीलश्च भवति ।

- कर्कस्य षष्ठनवांशे लम्ब किन्तु स्थूलदेहयुक्तः, सुन्दरनेत्रयुक्तः, गौरवर्णः, वक्ता च भवति ।

- कर्कस्य सप्तमनवांशे अल्परोमवान्, स्थूलदेहधारी, रक्षकः वा द्वारपालकर्मणिनिपुणः, काकचेष्टायुक्तः, स्फूर्तिवान् च भवति ।

- कर्कस्य अष्टमनवांशे सुन्दरमुखयुक्तः, कच्छपसदृशगमनकर्ता, श्यामवर्णी च भवति ।

- कर्कस्य नवमनवांशे जातकः गौरवर्णः, मीनसदृशनेत्रयुक्तः, कोमलः, औदार्यभावयुक्तः, दीर्घवक्षस्थलयुक्तः, दीर्घजङ्घायुक्तश्च भवति ।

### ५.६.५ सिंहनवांशः

- सिंहस्य प्रथमनवांशे जातकः मन्दाग्नियुक्तः, साहसी, दीर्घशिरयुक्तः, शूरः, उन्नतवक्षस्थलयुक्तः, प्रेमी आवेगवान् च भवति ।

➢ सिंहस्य द्वितीयनवांशे दीर्घललाटयुक्तः, दीर्घनेत्रयुक्तः, सिंहाकृतियुक्तः, उन्नतवक्षस्थलयुक्तश्च भवति ।

➢ सिंहस्य तृतीयनवांशे अतिरोमयुक्तः, चकोरः, दीर्घनेत्रयुक्तः, लम्बभुजा, उन्नतवक्षस्थलयुक्तश्च भवति ।

➢ सिंहस्य चतुर्थनवांशेतैलीयत्वक् वान्, गौरवर्णः, सुन्दरनेत्रयुक्तः, दीर्घहस्तौपादौ च, अल्पभोजनकर्ता च भवति ।

➢ सिंहस्य पञ्चमनवांशे अल्पकेशयुक्तः, श्वेताक्षियुक्तः, दीर्घोदरयुक्तः, साहसी, तीक्ष्णदंष्ट्रयुक्तश्च भवति ।

➢ सिंहस्य षष्ठनवांशे जातकः अल्पश्मश्रुवान्, श्यामवर्णः, श्वेताक्षियुक्तः, स्त्रीसुलभसौन्दर्यवान्, कार्ये निपुणश्च भवति ।

➢ सिंहस्य सप्तमनवांशे लम्बमुख-शिरयुक्तः, हृष्ट-पुष्टतनयुक्तः, श्यामवर्णः, कूटनीतिज्ञः, कटुभाषी च भवति ।

➢ सिंहस्य अष्टमनवांशे शिष्टभाषी, स्थिराङ्गयुक्तः, गम्भीरस्व-भाववान्, कपटयुक्तदृष्टिः, निषिद्धकर्मकर्ता, गुप्तचरः, कूटकर्मणिनिपुणश्च भवति ।

➢ सिंहस्य नवमनवांशे जातकः गर्दभमुखी, लम्बभुजायुक्तः, सुन्दरः, कृशकटियुक्तः, श्वासोच्छ्वासरोगपीडितः च भवति ।

### ५.६.६ कन्यानवांशः

➢ कन्यायाः प्रथमनवांशे जातकः मृगसदृशनेत्रयुक्तः, वक्तृत्वकलायां निपुणः, दीर्घशरीरधारी, दानस्योपभोगकर्ता, धनवान् सुन्दरश्च भवति

➢ कन्यायाः द्वितीयनवांशे वर्तुलाकारमुखयुक्तः, सुन्दरनेत्रयुक्तः, मृदुवक्ता, चञ्चलः, निर्छलः च भवति ।

- ➢ कन्यायाः तृतीयनवांशे उच्चस्वरयुक्तः, कान्तिमान्, गौरवर्णः, लम्बनासिका युक्तश्च भवति ।

- ➢ कन्यायाः चतुर्थनवांशे स्त्रीषु प्रसिद्धः, सुकुमारः, गौरवर्णः, सत्यज्ञाता, तीक्ष्णः, कृशः, द्विशिरयुक्तश्च भवति ।

- ➢ कन्यायाः पञ्चमनवांशेदीर्घोष्ठयुक्तः, लम्बशरीरवान्, दीर्घवक्षस्थलयुक्तः, पराश्रितश्च भवति ।

- ➢ कन्यायाः षष्ठनवांशे कान्तियुक्तः, सुवक्ता, उत्तमशरीरवान्, आकर्षकः, शास्त्रज्ञः, लिपि-लेखनज्ञाता, भ्रमणशीलः, स्वच्छचित्तयुक्तश्च भवति ।

- ➢ कन्यायाः सप्तमनवांशेलघुमुखयुक्तः,पिङ्गलकेशयुक्तः, दीर्घपादयुक्तः, जलेन भीतः, कोमलहस्तरेखा युक्तश्च भवति ।

- ➢ कन्यायाः अष्टमनवांशे सुकुमारः, उन्नतनेत्रयुक्तः, गौरवर्णः, लम्बभुजायुक्तः, आक्रामकः, स्वाभिमानी च भवति ।

- ➢ कन्यायाः नवमनवांशे जातकः लोकप्रसिद्धः, कोमलनेत्रयुक्तः, मन्त्रवित्, साहसी, चतुरः, लेखनकर्मणि कुशलः,विद्वान्भवति।

### ५.६.७ तुलानवांश:

- ➢ तुलायाः प्रथमनवांशे जातकः गौरवर्णः, दीर्घनेत्रयुक्तः, लम्बमुखयुक्तः, धनरक्षकः, व्यापारकुशलः, विख्यातश्च भवति ।

- ➢ तुलायाः द्वितीयनवांशे सजलनेत्रयुक्तः, विस्मृतहृदयी, कृशशरीरयुक्तः, विचारेषु मग्नश्च भवति ।

- ➢ तुलायाः तृतीयनवांशे गौरवर्णः, अश्वमुखी, सुन्दरदन्तपङ्क्तियुक्तः, उन्नतनेत्रयुक्तः, मेधावी, यशस्वी, सुन्दरनासिकायुक्तश्च भवति ।

➢ तुलायाःचतुर्थनवांशे दुर्बलस्कन्धयुक्तः, भयभीतः, वक्रदन्तपङ्क्तियुक्तः, कृशः, मृगाक्षियुक्तः, दुःखी, सद्व्यवहारयुक्तश्च भवति।

➢ तुलायाः पञ्चमनवांशे गम्भीरनेत्रयुक्तः, स्थिरात्मा, मित्रप्रियः, रुक्षकेशयुक्तश्च भवति।

➢ तुलायाः षष्ठनवांशेगौरवर्णः, दीर्घनेत्रयुक्तः, सद्वंशी, नीतिज्ञः, विद्वान्, विविधविषयज्ञाता, शास्त्रज्ञश्च भवति।

➢ तुलायाः अष्टमनवांशे उच्चकपोलयुक्तः, विषमशरीरधारी, स्पष्टवक्ता, शान्तचित्तः, सुडौलवक्षस्थलयुक्तः, दीर्घमस्तिष्कवान् च भवति।

➢ तुलायाः नवमनवांशे जातकः प्रसन्नचित्तः, गौरवर्णः, समसुन्दरशरीरयुक्तः, कलारथ, नम्रः, हास्ययुक्तस्वस्वभाववान्, चञ्चलनेत्रयुक्तः, वराङ्गनागामी च भवति।

**५.६.८ वृश्चिकनवांश:**

➢ वृश्चिकस्य प्रथमनवांशे लघुहोष्ठयुक्तः, स्थूलललाटयुक्तः, गौरवर्णः, दृढ-अङ्गधारी, समाजे प्राधान्यं च धारयति।

➢ वृश्चिकस्य द्वितीयनवांशे लम्बभुजायुक्तः, दीर्घवक्षस्थलं, उग्रनेत्रवान्, घातकी, साहसी, अल्पकेशयुक्तश्च भवति।

➢ वृश्चिकस्यतृतीयनवांशे लम्बभुजायुक्तः, दीर्घवक्षस्थलयुक्तः, धनार्थं सदैवप्रयत्नरथ, स्पष्टवक्ता, गौरवर्णः, अविवाहितायाः पुत्रश्च भवति।

➢ वृश्चिकस्यचतुर्थनवांशेपरनार्या सह विश्वासघाती, भ्रमणशीलः, श्यामवर्णः, धैर्यवान्, साहसी, नटश्च भवति।

➢ वृश्चिकस्य पञ्चमनवांशे रक्तनेत्रयुक्तः, धैर्ययुक्तः, सुपाच्यभोजनकर्ता, दीर्घोदरयुक्तः, उग्रः, यशस्वी च भवति।

➢ वृश्चिकस्य षष्ठनवांशे जातकः धूर्तः, सुबुद्धियुक्तः, गम्भीरः, साहसी, सुकर्मकर्ता, निपुणः, अल्पकेशी च भवति ।

➢ वृश्चिकस्य सप्तमनवांशेविदीर्णमुखयुक्तः, स्थिराङ्गधारी, दीर्घनेत्रयुक्तः, यौनदौर्बल्ययुक्तः, दीर्धमस्तकधारी च भवति ।

➢ वृश्चिकस्य अष्टमनवांशे नासिकायाः अग्रभागे दैर्घ्ययुक्तः, कालेन विपत्तियुक्तः, श्यामवर्णी, परित्यक्तबुद्धियुक्तश्च भवति ।

➢ वृश्चिकस्य नवमनवांशे गौरवर्णः, सुन्दरदेहधारी, शान्तचित्तः, दृढतनुयुक्तः, गुरुजनैः सम्मानितश्च भवति ।

### ५.६.९ धनुनवांश:

➢ धनुराशेः प्रथमनवांशे जातकः दूरदर्शी, स्पष्टवक्ता, सुन्दरनेत्रयुक्तः, गौरवर्णः, बुद्धिमानेषु प्रधानः, कपटी, साहसी च भवति ।

➢ धनुराशेः द्वितीयनवांशे उन्नतशिरयुक्तः, दीर्घनेत्रवान्, विकृतनासिकायुक्तः, स्थूलनितम्बधारी, दीर्घदेहधारी, धीरः, गम्भीरश्च भवति ।

➢ धनुराशेः तृतीयनवांशे सुन्दरनयनयुक्तः, शिक्षाशास्त्री, गम्भीरः, नीतिज्ञः, रम्भाप्रियः, मनस्वी, हास्यकला निपुणश्च भवति ।

➢ धनुराशेः चतुर्थनवांशे जातकः सर्वकार्ये निपुणः, मादकनेत्रयुक्तः, गौरवर्णः, पीडितः, भ्रमणशीलः, सुन्दरः मूर्तिमान् च भवति ।

➢ धनुराशेः पञ्चमनवांशे समानदेहधारी, दीर्घनेत्रयुक्तः, उन्नतभ्रमरयुक्तः, द्रव्यप्रेमी, विध्वंसकारी, अहङ्कारयुक्तः, दृढबुद्धियुक्तश्च भवति ।

➢ धनुराशेः षष्ठनवांशेदीर्घललाटयुक्तः, सु-आचरणयुक्तः, काव्यकर्ता, त्यक्तः, मन्दभाग्यः, विद्वान् कथावक्ता च भवति ।

➢ धनुराशेः सप्तमनवांशेमृदुभाषी, उन्नतशिरयुक्तः, गुप्तयोजना कर्ता, लम्बशरीरधारी, कार्ये निपुणः, ज्येष्ठनार्या सह मृदुव्यवहारयुक्तश्च भवति ।

➢ धनुराशेः अष्टमनवांशे व्याकुलनेत्रयुक्तः, बहुभाषी(प्रलापी), अकारणशत्रुता उत्पन्नकर्ता, नासिकायाः अग्रभाग: विशालः, बहुशत्रुयुक्तश्च भवति।

➢ धनुराशेः नवमनवांशे गौरवार्णः, सौम्यः, अश्वमुखी, असितनेत्रयुक्तः, सत्यवादी, पत्न्या दुःखी, उद्विग्नचित्तः, व्यग्रश्च भवति ।

### ५.६.१० मकरनवांश:

➢ मकरस्य प्रथमनवांशे श्यामवर्णः, बहुकेशयुक्तः, दुर्बलः, विनोदी, गीतकारः, शक्तिशाली च भवति ।

➢ मकरस्य द्वितीयनवांशे आलस्ययुक्तः, धूर्तः, वक्रनासिकायुक्तः, गायनकर्मणि रतियुक्तः, विशालदेहधारी, बहुभाषी, दृढप्रतिज्ञश्च भवति ।

➢ मकरस्य तृतीयनवांशे गायकः, कलाविद्, सुन्दराङ्गयुक्तः, बहुमित्रयुतः, बन्धुयुतः, इष्टकर्म कर्ता च भवति ।

➢ मकरस्य चतुर्थनवांशे श्वेतनेत्रयुक्तः, दीर्घललाटं, दुर्बलदेहयुक्तः, अस्पष्टवक्ताच भवति।

➢ मकरस्य पञ्चमनवांशे उन्नतनासिकायुक्तः, सुन्दरः, सुवंशोद्भवः, श्यामवर्णः, कार्यसमाप्त्यनन्तरमेव धैर्यं धरति ।

➢ मकरस्य षष्ठनवांशे कोमलः, कान्तियुतः, दीर्घललाटयुतः, कामी, सुवक्ता सुन्दरवेशधारी च भवति ।

➢ मकरस्य सप्तमनवांशे श्यामवर्णयुक्तः, कठोरतनयुक्तः, कोमलाङ्गयुतः, सुभाषी, बुद्धिमान्, सदाचारी, सुशीलः, सम्पन्नश्च भवति ।

➢ मकरस्य अष्टमनवांशे गम्भीरः, सुन्दरनासिका एवं च नेत्रयुक्तः, दीर्घतनुयुक्तः, निश्छलदृष्टिः, शक्तिशाली च भवति ।

➢ मकरस्य नवमनवांशे जातकः दीर्घनेत्रयुतः, सुबुद्धिधर्ता, गीत-सङ्गीते रतः, कोमलः, सात्त्विकवृत्तियुक्तः, साहसी सज्जनश्च भवति ।

**५.६.११ कुम्भनवांश:**

➢ कुम्भस्य प्रथमनवांशे जातकः श्यामवर्णयुक्तः, शास्त्रेषु काव्येषु च प्रवीणः, स्त्रीप्रियः, भावुकः, कोमलश्च भवति ।

➢ कुम्भस्य द्वितीयनवांशे कम्पितदृष्टियुक्तः, अपतौभयरहितः, सज्जनः, साधुस्वभावयुक्तः, दीन-दुःखीजनानामाश्रयदाताकिन्तु मूर्खसदृशो भवति ।

➢ कुम्भस्य तृतीयनवांशे मिश्रशरीरवान्, सुन्दरीणां मध्ये प्रियवैदूर्यसदृशकान्तियुक्तः, शास्त्रज्ञः, कार्येषु शास्त्रप्रयोगं कृत्वैव निश्चयं कुरुते।

➢ कुम्भस्य चतुर्थनवांशे स्त्रिभिरासक्तः, अतीवमूर्खः, गौरवर्णः, शत्रुहन्ता, भोग-विलासे सदैवरतश्च भवति ।

➢ कुम्भस्य पञ्चमनवांशे स्पष्टवक्ता, कठोरः, अवरुद्धकर्णयुक्तः(बधिरः), श्यामवर्णः, छिद्रयुक्तकपोलधारी च भवति ।

➢ कुम्भस्य षष्ठनवांशे व्याघ्रमुखी, साहसी, निश्चितार्थज्ञाता, हिंसकप्राणीनां(सिंह-व्याघ्र-भालू-सर्पादीनां विनाशकः)घातकः, राज्यप्रियश्च भवति ।

➢ कुम्भस्य सप्तमनवांशे सुन्दरनेत्रयुक्तः, अश्लिलः, मानवसमूहे न अपितु एकाकी एव तिष्ठति तथापि पारिवारिकसदस्येषु मित्रजनेषु च सदैव स्निह्यति (स्नेहं धारयति) ।

➢ कुम्भस्यअष्टमनवांशे सत्त्वबुद्धियुक्तः, राज्ञः प्रेमी, सैन्याधिकारी, सुभगः, मैत्रीपूर्णस्वभावयुक्तश्च भवति ।

➢ कुम्भस्यनवमनवांशे श्यामवर्णः, वर्तुलाकारमुखयुक्तः, सुन्दरः सुस्पष्टदेहयुतः, सुवक्ता, प्रसिद्धः, पत्नी पुत्रयुतश्च भवति ।

**५.६.१२ मीननवांश:**

➢ मीनस्य प्रथमनवांशे जातकः गौरमिश्रितरक्तवर्णः, बुद्धिमान्, कोमलाङ्गी पत्नीयुतः, चञ्चलचित्त्,आशायुक्तः, उत्साहीच भवति ।

➢ मीनस्य द्वितीयनवांशे सुन्दरदेहयुक्तः, दीर्घनासिकायुतः, धार्मिककार्यनिपुणः, मांसभक्षी, अरण्ये पर्वतेषु च विचरणशीलः भवति ।

➢ मीनस्य तृतीयनवांशे गौरवर्णः, सुन्दरनेत्रयुक्तः, आकर्षकदेहवान्, धैर्यवान्, विद्वान्, नम्रः, विनीतः, रूपवान्, चतुरः, कृपादृष्टियुक्तश्च भवति ।

➢ मीनस्य चतुर्थनवांशे गुणवान्, विद्वान्, धार्मिककार्यनिपुणः, साहसी, नीतिज्ञः, परसहायकः, विपत्तिशीलश्च भवति ।

➢ मीनस्य पञ्चमनवांशे लम्बकर्णयुक्तः, प्रतापी, हिंसापूर्णः, आध्यात्मिककार्येषु रतः, असह्यः, श्यामवर्णश्च भवति ।

➢ मीनस्य षष्ठनवांशे जातकः कोमलः, साहसी, गुणवान्, स्वसमाजेप्रसिद्धः, वक्राङ्गयुक्तः, अभिमानी, वक्रमुखयुक्तः, निपुणःच भवति ।

➢ मीनस्य सप्तमनवांशे मदयुतः, नास्तिकः, श्रेष्ठः, सचिवः, दुराग्रही, मन्त्री, बलवान्, धूर्तः, दुःखी, अस्थिरः, उद्विग्नश्च भवति ।

➢ मीनस्य अष्टमनवांशे लम्बशिरयुक्तः, कर्मण्यालस्यः, कृशः, पुत्रसुखविहीनः, धनवान्,अकारणयुद्धप्रियश्च भवति ।

➢ मीनस्य नवमनवांशे जातकः लघुकायः, धैर्यवान्, दीर्घवक्षस्थलयुक्तः, प्रसिद्धः, बुद्धिमान्, गुणवान्, यशस्वी च भवति ।

## ५..७ सर्वेषांग्रहाणां नवांशे सूर्यफलम्:-

➢ **सूर्यनवांशे सूर्यफलम्**

जातकः अभिमानी, अल्पसुखी, कलहप्रियः, चतुरः, प्रभावहीनः, पराधीनः, रोगग्रस्तो च भवति । "नवांशके स्वे सविता प्रसूते नरं पराभूतमनल्पसौख्यम्। कलिप्रियं वक्रिणमद्यशीलं गतप्रभावं बहुरोगभाजम्।।"[223]

➢ **चन्द्रनवांशे सूर्यफलम्**

जातकः निपुणः, ज्ञानी, पुत्रवान्, यशस्वी, धनवान्, उच्चाधिकारी प्रियः, स्व-पक्षेषु प्रधानश्च भवति । नवांशके रात्रिपतेर्विवस्वान्करोति मर्त्यं स्थित एव दक्षम्। सुतान्वितं ग्रानयशोधनाढ्यं नृपप्रियं मुख्यतमं स्वपक्षे ।।"[224]

➢ **भौमनवांशे सूर्यफलम्**

जातकः दरिद्रः, रोगी, दुःखी, वातरोगपीडितः, पापकर्म रतः, समाजे पतितश्च भवति । "कुजस्य भानुर्नवभागसंस्थो दरिद्ररोगाभिहतं प्रसूते । निराकृतं दीनमरुत्प्रकोपं पापानुरक्तं कृतजार्तिभाजम्।।"[225]

➢ **बुधनवांशे सूर्यफलम्**

---

223 षडवर्गफलप्रकाशः, पृ. ५४नवांशफलविचारः१११

224 षडवर्गफलप्रकाशः, पृ. ५४ नवांशफलविचारः११२

225 षडवर्गफलप्रकाशः, पृ. ५४नवांशफलविचारः११३

जातकः वातरोगी, शत्रुहन्ता, पुत्रींसदैव स्निह्यति, सहजसुखी, भोगेषु लिप्तः च भवति ।तिष्ठन् रविः सोमसुतस्य जातं नवांशके वातभयं करोति । जितारिपक्षं सुतयानुरक्तं नरं सदा भोगसुखैरुपेतम्।।"[226]

- **बृहस्पतिनवांशे सूर्यफलम्**

जातकः सत्यवादी, धनवान्, तपानुरक्तः, आस्तिकः, पुरुषार्थी, जितेन्द्रियः, सर्वसुखसम्पन्नश्च भवति । "नवांशके देवपुरोहितस्य तिष्ठन् रविः सत्यधनं प्रसूते । तपोनुरक्तं कृतिनामभीष्टं जितेन्द्रियं सर्वसुखादिवासम्।।"[227]

- **शुक्रनवांशे सूर्यफलम्**

जातकः वाहनयुतः, रोगप्रतिकारकक्षमतारहितः, बन्धुजनेषु प्रियः प्रधानः वा, विवेकी, धार्मिकः, साहसी, शत्रुविजती च भवति । "ईत्यान्वितं बन्धुजनप्रधानं विवेकिनं धर्मपरञ्जितारिम्।।"[228]

- **शनैश्चरनवांशे सूर्यफलम्**

जातकः पराजितः, निर्धनः, अल्पशान्तियुक्तः(अधीरः), कामी, बन्धुरहितः, रोगी, दुर्गतिप्राप्तश्चभवति। "पराजितं निर्धनमल्पवीर्यं कामान्वितं बन्धुजनैर्वियुक्तम्। शनेर्नवांशेसविता प्रसूते नरं खलं दुर्गतिरोगभाजम्।।"[229]

सूर्यः यदि जन्माङ्गे स्वोच्चराशौ किन्तु स्वनवांशेनीचस्थो भवति तर्हि राजपुत्रो भवेच्चेत् तदापि निर्धनः, दरिद्रश्च भवति (अर्थात् राजभङ्गयोगोत्पद्यते)। यदि नवांशे सूर्यः बलवान् भवति तदा जातकः मनोहरः, आभूषणैर्युक्तः, सुखी,

---

226 षडवर्गफलप्रकाशः, पृ. ५४नवांशफलविचारः११४

227 षडवर्गफलप्रकाशः, पृ. ५४नवांशफलविचारः११५

228 षडवर्गफलप्रकाशः, पृ. ५५नवांशफलविचारः११६

229 षडवर्गफलप्रकाशः, पृ. ५५नवांशफलविचारः११७

शान्तचित्तः, निरोगी, सुशीलश्च भवति । यदि सूर्यः बलहीनो स्यात्तदा जातकः प्रियजनरहितो, विषाग्नि-शस्त्र-ज्वरपीडितो, पित्रोः अपमानकर्ता च भवति ।

## ५.८ सर्वेषां ग्रहाणां नवांशे चन्द्रफलम् :-

### ➢ सूर्यनवांशे चन्द्रफलम्

जातकःदुष्टः, चञ्चलः, आचारभ्रष्टः, पापी, अल्पबुद्धियुक्तः, चञ्चलस्त्रीयुक्तः,शत्रुणा पराजितश्च भवति । “नवांशके रात्रिपतिर्यदा स्यात् सूर्यस्य दुष्टं मनुजं प्रसूते । स्त्रीचञ्चलं पापरतं सदैव प्रनष्टबुद्धिं विजितं परैश्च ।।”[230]

### ➢ चन्द्रनवांशे चन्द्रफलम्

जातकः रूपवान्, सुभगः, सुशीलः, नारीसम्मानकर्ता, सर्वगुणसम्पन्नः, विद्याविनीतः, मानवप्रियश्च भवति । “नवांशके स्वे प्रकरोति चन्द्रो नरं सुरूपं सुभगं सुशीलम्। स्त्रीसम्मतं सर्वगुणैः समेतं विद्याविनीतं जनवल्लभञ्च।।”[231]

### ➢ भौमनवांशे चन्द्रफलम्

जातकः नेत्ररोगी, दुर्बलः, अल्पसाहसी, असफलः, प्रेमी, भाग्यहीनश्च भवति । “नवांशके भूमिसुतस्य चन्द्रस्त्वसृग् रुगार्तिंप्रकरोति मर्त्यम्। क्लीबं कृशं व्याधितमल्पसत्त्वं स्त्रीदुर्भगं कामपरं सदैव ।।”[232]

### ➢ बुधनवांशे चन्द्रफलम्

जातकः सौम्यः, सुखी, देव-गुरु-ब्राह्मणेषु च आसक्तः, धनवान्, यथार्थरूपेण पण्डितः, प्रसन्नचित्तः, गरिमापूर्णश्च भवति । “सौम्यस्य भागे नवमे शशाङ्कः

---

230 षडवर्गफलप्रकाशः, पृ. ५५नवांशफलविचारः१२१

231 षडवर्गफलप्रकाशः, पृ. ५५नवांशफलविचारः१२२

232 षडवर्गफलप्रकाशः, पृ. ५५नवांशफलविचारः१२३

करोति सौम्यं सततं सुखाढ्यम्। नित्यं सुहृद्देवगुरुप्रसक्तं महाधनं पण्डितमप्रमेयम्।।"[233]

➢ **बृहस्पतिनवांशे चन्द्रफलम्**

जातकः नीतिज्ञः, सत्यवादी, विद्या-विनीतः, मित्रेषु श्रेष्ठः, गुरुजनानां विद्वज्जानाञ्च कृपा भाजकः च भवति । "गुरोर्नवांशे विचरन् शशाङ्कः करोति मर्त्यं नयसत्यसारम्। विद्याविनीतं सुहृदां वरिष्ठं द्विजप्रियं रोगभयं व्यपेतम्।।"[234]

➢ **शुक्रनवांशे चन्द्रफलम्**

जातकःअत्यधिकधनयुक्तः, पूण्यशाली, आतिथ्यप्रियः, सुन्दरश्च भवति । शुक्रस्य भागे नवमे शशाङ्को नरं प्रसूते बहुवित्तवन्तम्। पुत्रान्वितं पुण्यधनैरूपेतं प्रियाऽऽतिथिं सर्वजनाभिरामम्।।"[235]

➢ **शनैश्चरनवांशे चन्द्रफलम्**

जातकः नव्योपाधिप्राप्तः,अत्यन्तकटुवक्ता, विकृतस्वभाववान्, धनलुब्धकः, व्यसनी च भवति । चन्द्रः शनेर्भागमनु प्रयातो नवाख्यमत्यन्तदुरुक्तवाच्यम्। नरं प्रसूते विकृतस्वभावं परार्थ लुब्धं वयसनैः समेतम्।"[236]

चन्द्रः स्वनवांशे बलवान् भवेत् तदा जातकः सुपुत्रयुक्तः, वाहनसुखप्राप्तकर्ता, सुकुमारदेहधारी, निरोगी, सर्वकलापरिपूर्णः च भवति । किन्तुचन्द्रःनवांशे यदि निर्बलो भवेत् तदा जातकः नीतिविहीनः, दुष्टः, भीरु, दुःखी, कृतघ्नः राजदण्डभाक् च भवति ।

## ५.९ सर्वेषां ग्रहाणां नवांशे भौमफलम् :-

---

233 षडवर्गफलप्रकाशः, पृ. ५५नवांशफलविचारः१२४

234 षडवर्गफलप्रकाशः, पृ. ५६नवांशफलविचारः१२५

235 षडवर्गफलप्रकाशः, पृ. ५६नवांशफलविचारः१२६

236 षडवर्गफलप्रकाशः, पृ. ५६नवांशफलविचारः१२७

## ➢ सूर्यनवांशे भौमफलम्

जातकः लुब्धः, वराङ्गनासङ्गाद् पीडितः, बहुभक्षि, अल्पसुखी, हृदयरोगी, धूर्तश्च भवति । "नवांशके वासरपस्य भौमो लुब्धं कुयोषित्तसङ्गचित्तम्। तिष्ठन् विधत्तेऽल्पसुखं मनुष्यं हृद्रोगिणं बह्वशिनं शठञ्च ।।"[237]

## ➢ चन्द्रनवांशे भौमफलम्

जातकः सुन्दरः, सुख-सम्मानयुक्तः, मित्रब्राह्मणातिथीनांसत्कारकर्ता, शान्तः, नारी सम्मानकर्ता, भ्रातृणां हितैषी च भवति । "चरन्नवांशे प्रकरोति भौमश्चन्द्रस्य कान्तं सुखमानयुक्तम्। सुहृद् द्विजातिथ्यपरं प्रशान्तं पूज्यं सतां बन्धुहिते रतञ्च ।।"[238]

## ➢ भौमनवांशे भौमफलम्

जातकः अतिहिंसकः, शस्त्रास्त्रेषु युद्धेषु च निपुणः, विकृतः, दुराचारी, सज्जनानां साधुजनानां च विद्वेषी भवति । "नवांशके स्वे प्रचरन् करोति भौमोऽतिहिंस्रंविकृतं मनुष्यम्। खङ्गादियुद्धे निपुणं विशीलं विद्वेषिणं साधुजनस्य नित्यम्।।"[239]

## ➢ बुधनवांशे भौमफलम्

जातकः विद्वजनपूजकः, धैर्यवान्, धनवान्, साहसी, सुभगः, साधुस्वभावयुक्तः, सुखी, सौभाग्यशाली, उदारचित्तवान् च भवति । "बुधस्य भौमो विचरन्नवांशे करोति मर्त्यं प्रणतां द्विजानाम्। द्रव्यान्वितं धीरमुदारसत्त्वं विस्तीर्णसत्त्वं सुभगं सुखाढ्यम् ।।"[240]

---

237 षडवर्गफलप्रकाशः, पृ. ५६नवांशफलविचारः१३०

238 षडवर्गफलप्रकाशः, पृ. ५६नवांशफलविचारः१३१

239 षडवर्गफलप्रकाशः, पृ. ५६नवांशफलविचारः१३२

240 षडवर्गफलप्रकाशः, पृ. ५७नवांशफलविचारः१३३

➢ **बृहस्पतिनवांशे भौमफलम्**

भिन्न-भिन्नान्नभक्षी, रण-कुशलः, शूरवीरः, साहसी, द्वीपेषु विचरणकर्ता, वाहनसुखयुक्तश्च भवति । "गुरोर्नवांशे विचरन्महीजः करोति मर्त्यं विविधान्नपानम्। शूरं प्रचण्डं रणरङ्गरक्तं गतद्विपं यानवरैः समेतम्।।"[241]

➢ **शुक्रनवांशे भौमफलम्-** जातकः प्रेमासक्तः, रतिक्रीडायामासक्तः, सुभाषी, मित्रे गुरवे च प्रीतियुक्तः, सुधर्मणि रतः, नैककर्मचारिभिर्युक्तश्च भवति । "शुक्रस्य भागे नवमे तु भौमः करोति मर्त्यं रतिलुब्धसौख्यम्। सुहृद् गुरुप्रीतिकरं सुवाक्यं सुधर्मरक्तं बहुभृत्ययुक्तम्।।"[242]

➢ **शनैश्चरनवांशे भौमफलम्**

जातकः बहुपापी, गुप्त एवं च नेत्ररोगी, आलोचकः, दुष्टः, स्त्रीविहीनः, व्यर्थप्रलापकर्ता, तर्कज्ञः च भवति । शनैर्नवांशे विगतो महीजो नरं प्रसूते बहुपापरक्तम्। गुह्याक्षिरोगोपहतंसुदुष्टं प्रियाविहीनं परतर्ककञ्च।।"[243]

यदि भौमः नवांशबलयुक्तो भवति तदा जातकः ब्राह्मण-देवपूजकः, शूरः, कीर्तियुक्तः, नार्याश्रयदाता, विद्यायुक्तः, नृपतुल्यःच भवति । किन्तु यदि भौमनवांशंबलहीनं स्यात्तदा जातकः रोगी, पीडितः, शत्रुभिर्प्रताडितः, मित्रादपमानितश्च भवति ।

## ५.१० सर्वेषां ग्रहाणां नवांशे बुधफलम् :-

➢ **सूर्यनवांशे बुधफलम्**

241 षडवर्गफलप्रकाशः, पृ. ५७नवांशफलविचारः१३४

242 षडवर्गफलप्रकाशः, पृ. ५७नवांशफलविचारः१३५

243 षडवर्गफलप्रकाशः, पृ. ५७नवांशफलविचारः१३६

जातकः पापकर्ता, विकृतः, स्त्रीसुखविहीनः, कलहप्रियः, चौरः, दुराचारयुक्तः, दुश्चरित्रवान्, द्युतप्रियश्च भवति ।“चरन्नवांशे दिनपस्य सौम्यः करोति पापं विकृतं मनुष्यम्। स्त्रीसौख्यहीनं कलहप्रियञ्च द्यूतप्रियं चौर्यरतं विशीलम्।।”[244]

➢ **चन्द्रनवांशे बुधफलम्**

जातकः सुन्दरमुखयुक्तः, उदारचेष्टायुक्तः, शत्रुहन्ता, ख्यातिप्राप्तः, मित्रैः स्त्रीभिश्च सम्मानितो भवति । चन्द्रांशके स्यान्नवमे यदा ज्ञः तदा विधत्ते सुमुखं नितान्तम्। ख्यातञ्च पुष्टं तमुदारचेष्टं जेतारिमान्यं सुहृदां सताञ्च ।।”[245]

➢ **भौमनवांशे बुधफलम्**

जातकःरक्तरोगी, दुःखेन पीडितः, कुतर्कवान्, मित्राणामनिष्टकर्ता, राज्ञा प्रताडित:, द्वेषीदुष्टश्च भवति । “नवांशके भूमिसुतस्य सौम्यो नरं विधत्ते रुधिरार्तदेहम्। वितर्कशीलं सुहृदामनिष्टं द्वेष्यं खलं पार्थिवपीडितञ्च।।”[246]

➢ **बुधनवांशे बुधफलम्**

जातकः सौम्यः, सुरूपः, सुभगः, ऐश्वर्यशाली, देव-ब्राह्मणपूजकः, प्रसन्नचित्तः, अतिथिप्रियश्च भवति। “नवांशके स्वे प्रकरोति सौम्यः सौम्यं सुरूपं सुभगं मनुष्यम्। देवद्विजातिप्रवणं प्रसन्नं प्रियातिथिं सर्वजनानुकूलम्।।”[247]

➢ **बृहस्पतिनवांशे बुधफलम्**

---

244 षडवर्गफलप्रकाशः, पृ. ५७नवांशफलविचारः१३९

245 षडवर्गफलप्रकाशः, पृ. ५७नवांशफलविचारः१४०

246 षडवर्गफलप्रकाशः, पृ. ५८नवांशफलविचारः१४१

247 षडवर्गफलप्रकाशः, पृ. ५८नवांशफलविचारः१४२

जातकः धनसुखप्राप्तकर्ता, सुमित्रैःसुखप्राप्तकर्ता, सुशीलः, सदाचारी, प्रतापी च भवति । "नवांशकस्थः सुरपूजितस्य सौम्यः प्रसूते सुखिनं मनुष्यम्। नानार्थलाभं प्रचुरप्रतापं सुमित्रयुक्तं प्रचुरं सुशीलम्।।"[248]

### ➢ शुक्रनवांशे बुधफलम्

जातकः धनयुक्तः, इच्छितसन्ततिप्राप्तकर्ता, विद्वज्जनानां पूजकः, मित्रयुक्तः, उदारचित्तवान्च भवति । "शुक्रस्य भागे नवमे बुधस्तु करोति मर्त्यं विवधार्थयुक्तम्। प्रभूतमित्रद्विजपूजनेष्टं सुतान्वितं नित्यमुदारचेष्टम्।।"[249]

### ➢ शनैश्चरनवांशे बुधफलम्

जातकःनिरोगी, कुशिल्पी, धर्माचरणविहीनः, आधारहीनः, परस्त्रीष्वासक्तः, गुणविहीनः, परधनहर्ता च भवति ।सौरस्य भागे नवमे वितिष्ठन् करोति सौम्यो निरुजं मनुष्यम्। कुशिल्पिनं साधुगुणैरयोग्यं पराङ्गनासक्तमनर्थयुक्तम्।।"[250]

नवांशे बुधः बलवान् भवेत् तदा जातकः पवित्रः, क्षमायां सत्ये च रतः, कृतज्ञः, धनवैभवयुक्तः, सर्वसुखसम्पन्नश्च भवति ।

## ५.११ सर्वेषां ग्रहाणां नवांशे गुरुफलम् :-

### ➢ सूर्यनवांशे बृहस्पतिफलम्

जातकः भृत्यः, दासकर्मकर्ता, दुष्टः, धनहीनः, भीरु, क्रोधी(प्रचण्डश्च) भवति। "प्रेष्यं कुकर्मातिखलस्वभावो धनैर्विहीनस्त्वथमन्दसत्त्वः। नवांशके वासरपस्य जीवो यदा तदा स्यान्मनुजः प्रचण्डः ।।"[251]

---

248 षडवर्गफलप्रकाशः, पृ. ५८नवांशफलविचारः१४३

249 षडवर्गफलप्रकाशः, पृ. ५८नवांशफलविचारः१४४

250 षडवर्गफलप्रकाशः, पृ. ५८नवांशफलविचारः १४५

251 षडवर्गफलप्रकाशः, पृ. ५८नवांशफलविचारः१४८

## ➢ चन्द्रनवांशे बृहस्पतिफलम्

जातकः सुभगः, मनोहरः, अतिथिप्रियः, मानवप्रेमी, प्रसन्नचित्तः, स्त्रीहितकर्ताच भवति । "नवांशके रात्रिपतेः सुरेज्यास्तिष्ठन्प्रसूते सुभगं मनुष्यम्। प्रियातिथिं प्रीतिकरं नराणां प्रसन्नचित्तं प्रमदास्वभीष्टम्।।"[252]

## ➢ भौमनवांशे बृहस्पतिफलम्

जातकः मुखरोगपीडितः, भीतः(भीरु), अतिदुष्टः, व्यसनयुक्तः, पापकर्मणि रतश्च भवति । "मुखादिरोगैः वयसनोपतप्तं भयान्वितं पापरतं प्रकाशम्। नवांशके भूमिसुतस्य जीवस्तिष्ठन्प्रसूतेऽतिखलं मनुष्यम्।।"[253]

## ➢ बुधनवांशे बृहस्पतिफलम्

जातकः दयावान्, मनोहरः, धर्मरतः, धनवान्, सुन्दरवेशधारी, शास्त्रार्थ(साहित्ये, वाद-विवादे च) निपुणो भवति । "बुधस्य भागे नवमे सुरेज्यस्तिष्ठन्प्रसूते सदयं मनोज्ञम्। वित्तन्वितं धर्मरतं सुवेषं शास्त्रार्थरक्तं गुरुभक्तियुक्तम्।।"[254]

## ➢ बृहस्पतिनवांशे बृहस्पतिफलम्

जातकः राज्ञःसदृशसुखी, धनवान्, स्त्री-पुत्रेण सुखी, शास्त्रार्थे निपुणः, सुरुचिसम्पन्नः, सुयोग्यजनयुक्तश्च भवति । "जीवो नवांशे च यदा स्वकीये तदा मनुष्यं नृपतुल्यवेशम्। वित्तान्वितं सौख्यकलत्रयुक्तं शास्त्रार्थयुक्तं सुजनार्थवन्तम्।।"[255]

## ➢ शुक्रनवांशे बृहस्पतिफलम्

---

252 षडवर्गफलप्रकाशः, पृ. ५८नवांशफलविचारः१४९

253 षडवर्गफलप्रकाशः, पृ. ५९नवांशफलविचारः१५०

254 षडवर्गफलप्रकाशः, पृ. ५९नवांशफलविचारः१५१

255 षडवर्गफलप्रकाशः, पृ. ५९नवांशफलविचारः१५२

जातकः सुखी, यशस्वी, तेजस्वी, कृतज्ञः, पुण्यात्मा, धार्मिकः, आस्थावान्, गुणवान्, सदाचारी च भवति । "शुक्रस्य भागे नवमे सुरेज्यस्तिष्ठन्प्रसूते सुखिनं मनुष्यम्। तेजस्विनं कीर्तिकरं कृतज्ञं पुण्यात्मकं धर्मरतं सदैव ।।"[256]

➢ **शनैश्चरनवांशे बृहस्पतिफलम्**

जातकःनेत्र-नासिका-कर्णादिषु रोगग्रस्तः, व्यसनी, अल्पबुद्धियुक्तः, आपदाग्रस्तः, धनहीनः, प्रतापहीनः, राज्ञा पीडितश्च भवति । "नासाक्षिरोगव्यसनैः समेतं श्रियाविहीनं विगतप्रतापम्। नवांशकस्थो रविजस्य जीवो नरं प्रसूते नृपपीडितञ्च।।"[257]

नवांशे यदि गुरुः निर्बलो भवेच्चेत्तदा जातकः भयाक्रान्तः, दुःखी, पापकर्मकर्ता, बुद्धिहीनः, सुखविहीनः, अज्ञातभय(भूत-प्रेतादिषु)त्रस्तः, शोकयुक्तश्च भवति । यदि नवांशे गुरुः मित्रक्षेत्री, वर्गोत्तमी वा भवेत् तदा जातकः सच्चारित्र्ययुक्तः, पत्न्याः साकं निष्ठावान्च भवति । यदि नवांशे गुरुः स्वराषिस्थो वा स्वोच्चराशौ स्यात्तदा जातकः बहुविवाहकर्ता(प्रणयप्रियः) भवति।

## ५.१२ सर्वेषां ग्रहाणां नवांशे शुक्रफलम् :-

➢ **सूर्यनवांशेशुक्रफलम्**

जातकःव्याकुलः, भीरु, निष्क्रियः, अल्पशक्तिमान्, धूर्तः, सुखहीनः, षडयन्त्रकर्ता, शत्रुप्रताडित:, आडम्बरकर्ता च भवति । "नवांशकस्थो दिनपस्य शुक्रः करोति मर्त्यंविकलं सुभीरुम्। बहुद्विषं निष्क्रियमल्पवीर्यं प्रपञ्चयुक्तं गतसत्त्वसौख्यम्।।"[258]

---

256 षडवर्गफलप्रकाशः, पृ. ५९नवांशफलविचारः१५३

257 षडवर्गफलप्रकाशः, पृ. ५९नवांशफलविचारः १५४

258 षडवर्गफलप्रकाशः, पृ. ५९नवांशफलविचारः१५५

## ➢ चन्द्रनवांशे शुक्रफलम्

जातकः पुत्रवान्, सुन्दरः सुशीलपत्नियुक्तः, धन-धान्यप्राप्तकर्ता, निर्बलशत्रुयुक्तः, बाधवैः सह प्रीतियुक्तश्च भवति । “नवांशको भार्गवनन्दनस्तु चन्द्रस्य धत्ते तनयं नराणाम्। सद्योषितां वै धनधान्यलाभं रिपुक्षयं बन्धुसमागमञ्च।।”[259]

## ➢ भौमनवांशे शुक्रफलम्

जातकः ईर्ष्यावान्, रक्तरोगी, द्वेषी, असामाजिकतत्त्वैः सर्वकारेण च पीडितः, नीतिविहीनश्च भवति ।यदि जन्माङ्गे नवांशे च भौम-शुक्रयोः युतिः दृष्टिर्वा भवेत् तदा जातकः भागचुम्बनप्रियो भवति ।“नवांशके भूमिसुतस्य शुक्रो नरं प्रसूते रुधिरार्द्दिताङ्गम्। प्रपीडितं दस्युनृपैः सदैव प्रद्वेषशीलं निकृतिप्रियञ्च।।”[260]

## ➢ बुधनवांशे शुक्रफलम्

बुद्धिमान्, धार्मिकः, तीर्थाश्रयी, देव-गुरुभक्तः, अतिथिप्रियः, अनुशासनप्रिय:(नियमितजीवनयापनकर्ता) च भवति । “बुधस्य भागे नवमे तु शुक्रः करोति मर्त्यं विवुधं सुधर्मम्। तीर्थाश्रयं देवगुरुप्रभक्तं प्रियातिथिं सन्नियमैरुपेतम्।।”[261]

## ➢ गुरुनवांशे शुक्रफलम्

जातकः देव-ब्राह्मणानां सम्मानकर्ता, विवेकी, ज्योतिर्विदः, नृपप्रियः, भ्रातृप्रियश्च भवति । “शुक्रो नवांशे सुरपूजितस्य करोति मर्त्यं प्रणतं द्विजानाम्। विवेकविद्यागमशास्त्रलुब्धं नृपप्रियं बन्धुजनैश्च सार्द्धम्।।”[262]

---

259 षडवर्गफलप्रकाशः, पृ. ५९नवांशफलविचारः१५६

260 षडवर्गफलप्रकाशः, पृ. ६०नवांशफलविचारः१५७

261 षडवर्गफलप्रकाशः, पृ. ६०नवांशफलविचारः१५८

262 षडवर्गफलप्रकाशः, पृ. ६०नवांशफलविचारः१५९

➢ **शुक्रनवांशे शुक्रफलम्**

जातकः आध्यात्मविद्यानिपुणः(रतः), स्वधर्मपालनकर्ता, बुद्धिमान्, शत्रुहन्ता, रिपुभयविहीनः, व्रतपालनकर्ता च भवति । "नवांशके स्वे भृगुजः प्रसूते अध्यात्मविद्यानिरतं मनुष्यम्। स्वधर्मपूज्यं सुधिया समेतं हतारिपक्षं व्रतशीलिनञ्च।।"[263]

➢ **शनैश्चरनवांशे शुक्रफलम्**

जातकः रोगग्रस्तः, दुःखी, स्त्री-पुत्रसुखेन रहितः(त्यक्तः), पीडितः, निम्नवर्गेण सह सम्पर्कप्रियःच भवति । "स्थितो नवांशेऽर्कसुतस्य शुक्रो नरं प्रसूते सरुजं सदुःखम्। भार्यासुतार्थैः परिवर्जितञ्च प्रपीडितं नीचजनैर्विशेषात्।।"[264]

शुक्रः यदि स्वनवांशे बलवान् (स्वक्षेत्री, उच्चस्थः व वर्गोत्तमो) भवेत् तदा जातकः शत्रुहन्ता, यज्ञप्रियः, दाता, प्रसिद्धः, दोषरहितः, स्वकुले समुदाये च प्राधान्यं धारयति । किन्तु यदि शुक्रः बलहीन: स्यात्तदा जातकः अज्ञातभयग्रस्तः, क्रूरः, मिथ्यावादी, कलहप्रियः, दोषयुक्तः, द्वेषी, सत्य-धनहीनः, मित्रविहीनश्च भवति । जन्माङ्गे नवांशे च शुक्रः शनैश्चरसहितो भवेत् वादृष्टो वा शनेः नवांशे स्यात् तदा जातकः अप्राकृतिकमैथुनीभवति।

## ५.१३ सर्वेषां ग्रहाणां नवांशे शनैश्चरफलम्

➢ **सूर्यनवांशे शनैश्चरफलम्जातकः**अतिक्रोधी, हिंसकः, सज्जनरहितः, द्वेषी, विध्वंशकारी, अपमानितश्च भवति । "सूर्यस्य भागे

263 षडवर्गफलप्रकाशः, पृ. ६०नवांशफलविचारः१६०

264 षडवर्गफलप्रकाशः, पृ. ६०नवांशफलविचारः१६१

नवमेऽर्कसूनुः करोति मर्त्यं बहुतीव्रकोपम्। हिंस्रप्रनष्टैः सुजनैर्वियुक्तं प्रद्वेषशीलं परिभूतमन्यैः।।"[265]

➢ **चन्द्रनवांशे शनैश्चरफलम्**

जातकः सुन्दरस्त्रीयुक्तः, शास्त्रानुरक्तः, यज्ञकर्ता, दानशीलः, जितेन्द्रियः, अनुसन्धानकर्ता, मन्त्रविद्यानिपुणश्च भवति । "चन्द्रस्य भागे नवमेऽर्कसूनुःनरं प्रसूते सुकलत्रयुक्तम्। शास्त्रानुरक्तं क्रतुदानशीलं जितेन्द्रियं मन्त्रविदां वरिष्ठम्।।"[266]

➢ **भौमनवांशे शनैश्चरफलम्**

जातकअश्लीलभाषी, परनिन्दकः, परस्त्रीष्वासक्तः, धूर्तः, विधर्मी, मित्रविहीनः, कुवेशी च भवति । "शनैश्चरो भौमनवांशसंस्थो नरं प्रसूते वचनस्वभावम्। पराङ्गनासङ्गरतं विधर्ममित्रैर्विहीनं सततं कुचैलम्।।"[267]

➢ **बुधनवांशे शनैश्चरफलम्**

जातकः सुखेन भोगेन च तृप्तः, सुन्दरः, शुभ-लाभयुक्तः, विधिज्ञः(वाक्कीलः वा अधिवक्ता), अतिथिप्रियः, यज्ञेष्वाचार्यो भवति ।"शनैश्चरः सौम्यनवांशसंस्थः करोति मर्त्यं सुखभोगतृप्तम्। कान्तं शुभं लाभपरं विधिज्ञं प्रियातिथिं यज्ञरतं प्रधानम्।।"[268]

➢ **बृहस्पतिनवांशे शनैश्चरफलम्**

---

265 षडवर्गफलप्रकाशः, पृ. ६०नवांशफलविचारः१६४

266 षडवर्गफलप्रकाशः, पृ. ६०नवांशफलविचारः१६५

267 षडवर्गफलप्रकाशः, पृ. ६१नवांशफलविचारः१६६

268 षडवर्गफलप्रकाशः, पृ. ६१नवांशफलविचारः१६७

जातकः धर्ममर्मज्ञः, शास्त्रचिन्तने सदैव रतः, विद्यायुतः, ज्योतिर्विदः, विवेकी, प्रसन्नचित्तः, प्रचूरान्नदाता च भवति ।"शनिर्नवांशे सुरपूजितस्य नरं प्रसूते सुरविप्रभक्तम्। विवेकविद्यागमसत्ययुक्तं प्रसन्नवक्त्रं प्रचुरान्नपानम्।।"[269]

➢ **शुक्रनवांशेशनैश्वरफलम्**

जातकः तीर्थाश्रयी, इष्टधर्मी, गुरुजनानां कृपापात्रः, बुद्धिमान्, विद्वान्, इष्टमतियुक्तः, मनोहरश्च भवति । "मार्त्तण्डजः शुक्रनवांशसंस्थः करोति तीर्थाश्रयमिष्टधर्मम्। प्राज्ञं कृतज्ञं बुधलोकसेव्यं जितेन्द्रियं शुभ्रमतिं मनोज्ञम्।।"[270]

➢ **शनैश्वरनवांशे शनैश्वरफलम्**

जातकः दानी, भोगी, सुन्दरस्त्री-उपभोगकर्ता, सदैवसुखी, शत्रुजेता, स्थिरः, उदारधीः, साहसी च भवति । "नवांशके स्वे प्रकरोति सौरो नरं सुदातारतरं विरोगम्। सुयोषिताभोगप्रवृद्धसौख्यं जितारिपक्षं स्थिरमुग्रवीर्यम्।।"[271]

शनैश्वरो नवांशे बलहीनो भवेत् तदा जातकः बहुशत्रुयुक्तः, पूर्वजीवने हिंसकः, धन-धान्यसम्पन्नः, कल्याणप्रदः, विविधविषयज्ञाता च भवति । यदि शनिः बलवान् भवेत् तदा तद्विपरीतं फलं लभ्यते जातकः ।

## ५.१४ वैवाहिकजीवनस्य सुखशान्त्यर्थं मेलापकमहत्त्वं नवांशस्य भूमिका च

विवाहे वैवाहिकजीवने वा जन्मकुण्डलीसदृशमेव नवांशस्य भूमिका महत्त्वपूर्णा भवति । नवांशं D-9 कथ्यते, तस्योपयोगः वैवाहिकमेलापककर्मणि, विवाहकालविषये, वैवाहिकजीवनविषये, जीवनसाथीविषये, जातकस्यचारित्र्यविषये, मानसविषये वा दैहिकस्वरूपविषये च भवति । तदुपरि

269 षडवर्गफलप्रकाशः, पृ. ६१नवांशफलविचारः१६८

270 षडवर्गफलप्रकाशः, पृ. ६१नवांशफलविचारः१६९

271 षडवर्गफलप्रकाशः, पृ. ६१नवांशफलविचारः१७०

नवांशकुण्डली मेलापककार्ये, द्वयोः (नर-नार्योः पारस्परिक)सम्बन्धस्य सुख-दुःखज्ञानविषये च नवांशस्य भूमिका महत्त्वं धारयति ।

ज्योतिषशास्त्रानुसारेण मेलपकस्योद्देश्यं सुखीदाम्पत्यजीवनं, वंशवृद्धिः, प्रतापयुक्तसन्तानोत्पत्तिः, नैरोग्यं, सानन्दं च जीवनं भवेदित्यस्ति । यद्यपि वर-कन्ययोः जन्माङ्गस्य मेलनमेव अन्तिमं नास्ति, कारणं यत् यदि द्वयोः जन्माङ्गे वा एकस्य जन्माङ्गे पार्थक्यं स्याद्वा वैधव्यादिदोषाः भवेयुस्तदा मेलनं निरर्थकं भवति तदुपरि द्वयोः दाम्पत्यजीवनस्य सुखाय सम्पूर्णभावानां, ग्रहाणां, स्वोच्चादिस्थानानां च सम्यग्विवेचनं कृत्वैव विवाहः करणीयः इति । फलितज्योतिशानुसारेण विवाहे प्रामुख्येन जन्मलग्नस्य चन्द्रलग्नस्य च प्राधान्यं भवति । चन्द्रलग्नमर्थात् जन्मकालिकचन्द्रनक्षत्रस्य स्थित्यनुसारेण मेलनं विधातव्यमिति । मेलापककर्मणि नक्षत्रमेलनं, ग्रहमेलनं, भावमेलनञ्च प्रशस्तम् ।

नक्षत्रमेलापके मुहूर्तचिन्तामणौ आचार्य 'रामदैवज्ञेन कथितमस्ति यत्- "वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम् । गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः ।।" इत्यनुसारेण मेलनं विधातव्यम् । ग्रहमेलापकानुसारेण यदि एकस्य जन्माङ्गचक्रे सप्तमभावे भौमशुक्रौ भवेतां तथा द्वितीयस्य जन्माङ्गचक्रे सप्तमभावे बुध-बृहस्पत्योः संस्थितिर्भवेतां तदा दम्पत्योः यौनाचरणे पर्याप्तविरोधाभासो भवति, अतः एतादृशी स्थितिः निवारणीया । जन्माङ्गमेलापककर्मणि भौम-शुक्रयोः लग्ने वा सप्तमे स्थितिः अनाचारं व्यभिचारं वा द्योतयति । किन्तु यदि एकस्य जन्मराशीशः शुक्रः तथा च द्वितीयस्य जन्मराशीशो भौमो भवति तथा द्वयोः लग्नस्य वा जन्मराश्यो: परस्परं सप्तमस्थानं स्यात्तदा द्वयोर्मध्ये स्वाभाविकाकर्षणं भवति तदुपरि यदि वृषराशिगतशुक्रो स्यात्तदा दाम्पत्यजीवनं सार्थकं भवतीति निश्चप्रचम् ।

तृतीयमस्ति भावमेलापकं- भावमेलापके वर-कन्ययोः समानलग्नमथवा परस्परं सप्तमलग्नं भवति तदा वैवाहिकजीवनम् आनन्दमयं भवति । द्वयोः परस्परसप्तमराशीः दाम्पत्यजीवने माधुर्यं विदधाति । वरस्य **नवांशलग्नं,** कन्यायाः जन्मलग्नं भवेत् अथवा कन्यायाः **नवांशलग्नं** वरस्य जन्मलग्नं भवति तदापि वैवाहिकं सुखं कथनीयम् । तदुपरि वरस्य जन्माङ्गाधिपतिः वा सप्तमाधिपतिः यस्मिन् **नवांशे** तिष्ठति तस्याधिपतेः राशी जायाराशी कथिता । सप्तमेशस्योच्चराशिरपि जायाराशी भवति, तथा च सप्तमभावस्य **नवांशोऽपि** कलत्रराशिसंज्ञां प्राप्नोति । एतादृशी स्थितिः वर-कन्ययोः मेलापककर्मणि प्रशस्तस्थितिः ज्योतिर्विदैः वर्णिताऽस्ति ।इत्थं मेलापकेऽपि नवांशस्य महत्त्वं वरीवर्ति ।

## ५.१५ मङ्गलदोषेऽपि नवांशमहत्त्वम्

वर-कन्ययोः जीवने भौमदोषः अनिष्टकारकः कथितः । कारणं यत् भौमः तमोगुणयुक्तः अग्निप्रधानश्च वर्तते तेन कारणेन वैवाहिकजीवने वा दाम्पत्यसुखे तथा च संतानोत्पत्तिकर्मणि भौमस्य प्रभावोऽधिको भवति । ज्योतिर्विदैः कथितं यत् “लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजः ।” अर्थात् वर-कन्ययोः लग्नभावे, चतुर्थभावे, सप्तमभावे, अष्टमभावे द्वादशभावे च भौमो भवति तदा माङ्गलिकदोषः उत्पद्यते । ज्योतिषशास्त्रानुसारेण वरस्य दाम्पत्यसुखं **नवांशेन** तथा च कन्यायाः दाम्पत्यसुखं त्रिंशांशकुण्डली आधारेण द्रष्टव्यम् । किन्तु माङ्गलिकदोषपरिहाराय वरस्य **नवांशकुण्डल्याः मेलनं कन्यायाः त्रिंशांशकुण्डल्याः** साकं करणीयं येन भौमदोषस्य परिहारो भवति ।[272]

## ५.१६ वैवाहिकजीवनस्य सुखम् (Happiness in Married Life)

---

[272] विवाह एवं दाम्पत्यसुख पृ. १०७


वैवाहिकजीवनसुखविषये **नवांशलग्नं, नवांशलग्नेशः, नवांशस्य सप्तमेशस्य च अ**त्यधिकं महत्त्वं भवति, विवाहानान्तरं सुखविषये च नवांशस्य स्थानबलाधारेण शुभग्रहाणां युति आधारेण च ज्ञातुं शक्यते । यथा- नवामांशः लग्ने लग्नेशः स्वगृहे, उच्चस्थाने वा स्वराशौ भवेत् अथवा शुभग्रहेण युक्तो दृष्टो वा भवेत् तदा वैवाहिकजीवनं सुखमयं स्यात् । तदुपरि नवमांशकुण्डली आधारेण सप्तमेशस्य स्थितिः, सूर्यचन्द्रयोः प्रथमस्थाने सप्तमस्थाने वा स्थितिः दाम्पत्यजीवनं क्लेशयुक्तं कुरुतः । तद्वदेव द्वादशस्थाने शनेः स्थितिः वैवाहिकजीवनम् अनिष्टकारकं निर्दिशति।

## ५.१७ भार्यायाः भर्त्रोः चस्वरूपम् (Appearance of Life Partner)


यदि नवांशलग्ने वा नवांशलग्नेशस्य चन्द्रेण सह युतिः दृष्टिर्वा स्यात् तदा जीवनसाथी सौम्यः सुन्दरो वा प्राप्यते, तद्वदेव शुक्रेण सह युतिः दृष्टिर्वा कलायुक्त-सौन्दर्यमयभर्तारस्य भार्यायाः वा निर्देशं करोति, बुधेन सह दृष्टिः युतिर्वा बुद्धियुक्तं करोति । सूर्येण सह दृष्टिः युतिर्वा स्वभावे उग्रतायाः निर्देशं करोति, गुरुः धार्मिकस्वभावस्य शुद्धविचारस्य च निर्देशं करोति, भौमः, राहुः केतुर्वा कपटयुक्तजीवनस्य निर्देशं कुर्वन्ति ।

## ५.१८ नवांशकुण्डली आधारेण दाम्पत्यजीवनम् :-

लग्न कुंडली




नवमांश




दाम्पत्यजीवनविषये वा दाम्पत्यसुखविषये जन्मलग्नकुण्डल्याः साकं नवमांशकुण्डल्याः विश्लेषणमपि आवश्यकं भवति, नवमांशं विहाय केवलं जन्मकुण्डली आधारेण दाम्पत्यसुखविचारः वा दाम्पत्यसुखविषयकं विश्लेषणं पूर्णतया स्पष्टं फलं कर्तुं न प्रभवति। यद्यप्यत्र मया केवलं नवमांशकुण्डली आधारेण उपर्युक्तोदाहरणमाध्यमेन वैवाहिकजीवनविषयकं फलं निर्धारितमस्ति।

प्रप्रथमं लग्नकुण्डली आधारेण लग्नजीवनविषयकः विचारः क्रियते, अनन्तरं **नवमांशाधारेण विवाहविषये** वैवाहिकजीवनविषये च विचारो विधीयते । नवमांशलग्नं, नवमांशलग्नेशः, नवमांशस्य सप्तमेशस्य स्थितिं सप्तमभावं च विचार्य वैवाहिकजीवनस्य कारकः कोऽस्ति तदधारेण वैवाहिकसुखं कीदृशं स्यादिति ज्ञायते । पुरुषस्य कृते शुक्रस्य तथा च कन्यायाः कृते बृहस्पतेः विचारो भवति । नवमांशलग्नेशः तथा च नवमांशकुण्डल्याः सप्तमेशस्योपरि शुभग्रहाणां दृष्टिः युतिर्वा भवेत्तदा दाम्पत्यजीवनं सुखमयं भवति। शुभग्रहाणां प्रभावेण दाम्पत्यजीवने द्वयोः स्वभावविषये, तथाचाचरणे सौम्यताविषये, बुद्धिमत्ताविषये च ज्ञातुं शक्यते । पापग्रहाणां प्रभावेण-अहंकारयुक्तः वा बुद्धिहीनजीवनसाथी मिलति । यदि

नवमांशलग्नं वा लग्नेशः बलयुक्तो वा शुभग्रहो भवेत्तदा द्वयोर्मध्ये ऐक्यं दरीदृश्यते । पुरुषस्य कृते विवाहसुखकारकः शुक्रः शुभस्थाने शुभग्रहेण वा युक्तो भवति एवं च कन्यायाः कृते वैवाहिकजीवनस्य कारको गुरुः शुभस्थाने शुभग्रहेण वा युक्तो भवति तदा दीर्घं सुखमयं च वैवाहिकजीवनं भवति । द्वयोः कारकग्रहयोः नवमांशकुण्डल्याः सप्तमस्थाने सप्तमेशेन च साकं भवति तदापि वैवाहिकजीवनं सुखमयं भाग्योदयकारकं च भवति ।

कन्यायाः लग्नकुण्डल्यां सप्तमेशः, बृहस्पतिः वा भाग्येशस्य सम्बन्धः भाग्यं बलयुक्तं करोति । व्यक्तेः जीवने विवाहानन्तरं आर्थिकोन्नति: सामाजिकप्रतिष्ठावृद्धिश्च भवति । किन्तु यदि नवमांशकुण्डल्याः सप्तमेशस्य सप्तमभावस्य वा पापग्रस्तस्थितिः अशुभप्रभावमुत्पादयति वैवाहिकजीवनं च कष्टदायकं करोति । इत्थं नवमांशकुण्डल्याः विश्लेषणेन ज्ञायते यत् लग्नस्य, लग्नेशस्य, सप्तमस्थानस्य, सप्तमेशस्य, स्वगृहस्थस्य, स्वोच्चस्थानस्थितस्य, शुभग्रहस्य, वैवाहिकजीवनस्य कारकयोः, बलीग्रहस्य च प्रभावो जीवने भवतीति निश्चप्रचम् ।नवमांशकुण्डल्याः चतुर्थभावेन द्वयोः जीवने गृह-वाहनादीनां सुखं कीदृशं भवेत् तदपि ज्ञातुं शक्यते ।

### ५.१९विवाहे लग्नशुद्धौ नवांशमहत्त्वम् :-

वैदिकार्षलौकिकग्रन्थेषु किमपि शुभकार्यं स्त्रीं विना पूर्णं न मतम् । समावर्तनकाले स्नातकाय स्ववंशपरम्परां रक्षणाय विवाहार्थमुपदिषते “प्रजातन्तुं मा व्यवच्छेत्सीः” । पुरुषार्थचतुष्टये तेजायुष्यबलाभ्युन्नत्यै, वैषयिकसुखाय, सन्तानोत्पत्तये, जातिसमाजयोः समृद्ध्यै विवाहरेवाकाट्यसाधनम् अन्वेषितम् । येन देव-पितृ-ऋषि-ऋणेभ्य उऋणो भूत्वा इहलौकिकजीवने सुखसमृद्धिं तथा पारलौकिकजीवने आत्मानन्दस्यानुभूतिं प्राप्यते नरः । सन्तानोत्पत्तये

वर्णाश्रमधर्मानुकूलमुत्तमकर्मसिद्धये अग्निब्राह्मणादयोः साक्षित्वे यूनोः पाणिग्रहणमेव विवाहसंस्कारः परिभाषितः ।

विवाहः शारीरिकाकर्षणस्य नरनार्योरागरूपकामेच्छा परिपाको नास्ति, अपितु गृहास्थाश्रमस्याधारः निगदितः । यत्र स्त्रीः सप्तवचोभिः पुरुषेण सह सम्बन्धैकामादर्शाचार त्रिवंशं सुखसुविधानामात्मसन्धानं साधयति । इदमेव कारणं येन विवाहस्य महत्त्वं संस्कारेषु सर्वोपरि निगदितं वर्तते । किन्तु विवाहे यद्यशुद्धिपूर्णं लग्नं भवेत् वा ग्रह-युती-स्थिति-दृष्टिवशात् लग्ने अशुद्धयः भवन्ति तर्हि लग्नजीवनं निरर्थकं दुःखास्पदं च भवति । अतएव ज्योतिषशास्त्रानुसारेण लग्नशुद्धिः अनिवार्यरूपेण द्रष्टव्या इति । लग्नजीवने दाम्पत्यसुखाय च नवांशस्य महत्त्वमतीव वरीवर्ति । तेनैव कारणेनात्र नवांशाधारितलग्नशुद्धिविषये विचारः कृतो वर्तते ।

ग्रहयुतिस्थितिदृष्टिवशादेव लग्नशुद्धिः मानवस्य शुभाशुभत्वं निर्धारयति । विवाहे प्रायशः सर्वाणि लग्नानि ग्राह्याणि, पुनरपि यस्मिन् कस्मिन्नपि विवाहलग्ने धनुतुलामिथुनकन्यानां **नवांशेषु** पाणिग्रहणं सर्वसम्मतम् । मतान्तरे **मीननवांशोऽपि** ग्राह्य, एष्वंशेषु विवाहित कन्या विवाहोत्तर्म निश्चयेन पतिव्रता ज्ञेया।[273]

दैवज्ञकालिदासमते विवाहलग्ने **चरनवांशान्** विहाय चरलग्नानि प्रसस्तानि । कतिपयविदुषाम्मतानि संगृह्य दैवज्ञेन दिवसे कर्कलग्नं विहाय अन्यानि लग्नानि रात्रौ तु सर्वाणि लग्नानि उद्वाहार्थं प्रशंसितानि ।

---

273 मुहूर्तचिन्तामणिः ६/८४

**शस्तः समस्तैरुदयैः शयग्रहः सजूककन्याजितुमांशकै रिह ।**

**शास्त्रादिखण्डैश्च चरोदये चर्म लग्नं विनैतद्धि नयप्रमाणता ।।**

**अकीटसद्राश्युदयेषु हारी यद् दिवाभुजाऽब्जग्रहणं विशारदैः ।**

**समग्रलग्नेषु समीरितं निशि प्रमाणमत्रेत्यखिलाङ्घ्रियुक्ष्वपि ।।**[274]

परञ्च तत्र दिवसे रात्रौ वा शुद्धलग्ननिर्णयार्थं लग्नानां पङ्गुबधिरज्ञानम् आवश्यत्वेन विज्ञेयम् । पूर्वाचार्यैः सिंहमेषवृषाः दिवसे कन्यामिथुनकर्काः रात्र्यन्धाः कथिताः । तथैव तुलावृश्चिकलग्ने दिवसे धनुमकरौ रात्रौ बधिरौ भवतः । कुम्भलग्नं दिवसे मीनलग्नं रात्रौ पङ्गु भवति ।[275] तत्र बधिरान्धादिसंज्ञाप्रयोजनं किम् ? तदुच्यते यत् बधिरलग्ने कृते नोद्वाहेन दरिद्रता, दिवान्धलग्ने कन्या वैधव्यं, रात्र्यन्धलग्ने सन्ततिः (मृत्युमुपैति) क्षयं वा विज्ञेयम् । यदि दोषपूर्णलग्नं तदधिपेन (नवांशाधिपेन) बृहस्पतिना वा दृष्टे सति तत्र दोषः विनष्टो जायते । यथा-

**दारिद्र्-य बधिरतनौ दिवान्धलग्ने वैधव्यं शिशुमरणं निशान्धलग्ने ।**

**पङ्वङ्गे निखिलधनानि नाशमीयुः सर्वत्राधिपगुरुदृष्टिभिर्न दोषः ।।**[276]

विवाहार्थं शुद्धलग्नस्य बलनिर्णयं लग्नेश-**नवांशेश**-सप्तमेशाद्यनुसृत्य निर्धार्यते । विवाहकालिकलग्नं लग्नस्य नवांशं सप्तमभावञ्च निजाधिपतयः पश्यन्ति, तल्लग्ने विवाहितकन्यायाः स्वामिनः दीर्घायुष्यं ज्ञेयम् । **नवांशेश**-लग्नेश-सप्तमेशादिभिः तत्तद् भवनमद्रुष्टे सति कन्यापतेः ऐश्वर्यं विनश्यति ।

---

274 ज्यो.वि. १३/२२-२३

275 मु. ग. १५/२०२-२०३

276 मु. चि. ६/८२

**लवामङ्गं च मदंशको मदो जिनाति सा सत्कमितुस्तनुश्रियम् ।**

**करार्देन तत्स च बोधनार्थयुक् तदा तदीयः प्रथयत्यधीश्वरः ।।**[277]

अन्यच्च किञ्चिद्भिन्नं मुहूर्तचिन्तामणौऽपि प्राप्यते यत् विवाहलग्नं लग्नस्थनवांशश्च तदधिपतिः पश्यति अथवा **नवांशेशः लग्नम्, लग्नेशः नवांशं पश्यति** तदा वरस्य शुभं स्यात् । इत्थं लग्ननवांशात् सप्तनवांशं तदधिपेन दृष्टः लग्नात्सप्तमभावं सप्तमेशेन दृष्टे सति अथवा द्वावेव परस्परमुभयोः गृहर्क्षं पश्यति तदोद्वाहः कन्यायै शुभदो स्यात् । यथा-

**लवेशो लवं लग्नपो लग्नगेहं प्रपश्येन्मिथो वा शुभं स्याद्वरस्य ।**

**लवद्यूनपोऽशं द्यूनं लग्नपोऽस्तं मिथो वीक्षते स्याच्छुभं कन्यकायाः ।।**[278]

अन्यच्च कश्यपमते तु **लग्नस्थनवांशस्य** अधिपतेः सुहृत् कश्चन सौम्यग्रहः **नवांशराशिं** लग्नं वा निरीक्षेत्तदा वराय शास्त्रोक्तः उत्तमफलदो ज्ञेयः । तथैव सप्तमनवांशस्य अधिपतेः मित्रं सौम्यग्रहः स्यात् । तेन सौम्यग्रहेण सप्तमनवांशराशिः अथवा सप्तमभवनं दृष्टे सति कन्यायै शुभाप्तिः विज्ञेया । परञ्च वसिष्ठनारदमते विषमपरिस्थितौ तयोः स्त्रीपुरुषयोः मृत्युरपि निर्दिष्टा । यथा-

**राश्यंशौ मित्रसौम्येन वीक्षितौ वाप्यसंयुतौ ।**

**उदयास्तांशयोः शुद्धिस्त्रिविधा मङ्गलप्रदा ।।**[279]

## ५.२०विवाहे ग्रहस्थितिवशाल्लग्नशुद्धिः

---

277मु. चि. ६/७७

278 बृ.दै.र. ७१/९३२ (बृहद् दैवज्ञरत्नम्)

279ज्यो.वि. १३/२६

उद्वाहार्थं शुद्धलग्ननिर्णयार्थं तद्वलञ्च विज्ञातुं ग्रहाणां संस्थितिज्ञानं नितान्तमपेक्षते । वैवाहिककाले निर्णीतलग्नाच्छुभग्रहाः लग्ने, द्वितीये, तृतीये, चतुर्थे, पञ्चमे, षष्ठे, नवमे, दशमे एकादशे वा स्थिताः स्युः । पापग्रहाणां त्रिषडायेऽष्टमे च संस्थितिः शुभदाः विज्ञेयाः । तत्र विशेषत्वेन द्वितीयतृतीयचतुर्थस्थः लाभस्थो वा चन्द्रः शुभदः, गुरुशुक्रौ द्वादशस्थौ शुभप्रदौ, भौमः अष्टमे अनिष्टकारको ज्ञातव्यः । यथा-

**सौम्या आषष्ठकर्मायनवसु शुभदास्त्र्यायषण्मृत्युगोन्यो ।**

**द्वित्र्यम्ब्वायस्थचन्द्रो व्ययग गुरुसितौ वाथ नेष्टोष्टमो सृक् ।।**[280]

उपायमकालिकलग्नात् तनौ चन्द्रः सपापः, षष्ठे चन्द्रभार्गवौ, सप्तमे सकलशुभाशुभग्रहाः, दशमे बुधः, द्वादशे चन्द्रस्त्रुतीये शुक्रः, अष्टमे भौमः शुभग्रहाः अरिष्टदाः । तस्माद्दम्पत्योः वा एकस्य कृते शोकप्रदः विज्ञेयः । स्वनिन्द्यस्थानानि विहाय शेषस्थानेषु शुभग्रहाः, एकादशे सर्वे खेटाः, त्रिषडाये पापग्रहाः शुभकारकाः, द्वितीयतृतीयचतुर्थस्थो वा चन्द्रोऽपि अभीष्टप्रदो भवति । लग्नेश **नवांशेश** दृक्काणेश षष्ठाष्टमे अशुभाः स्युः ।

**लग्ने चन्द्रखला रिपौ शशीसितौ सर्वे द्युने खे बुधो-**

**ऽब्जोऽन्त्यगुः सुखगोऽष्टमाः कुजशुभाः शुक्रस्तृतीयः शुचे ।**

**लाभे सर्वखगाः शुभा अखिलगास्त्र्याष्टारिगाः स्युः खला-**

**श्चन्द्रस्त्र्यम्बुधने श्रियेऽशुभदृकेट्स्यान्मृत्यवेऽष्टारिगः ।।**[281]

---

[280]मु. त. ७/८ पूर्वार्धः

[281]मुहूर्तमार्तण्डः ४/२४

परञ्च मुहूर्तगणपतिकारः किञ्चिद्भिन्नं व्यक्तीकरोति । तन्मते क्रमशः लग्ने सूर्यचन्द्रभौमशनिराहवः, तृतीये शुक्रः, षष्ठे चन्द्रशुक्रलग्नेशाः, अष्टमे चन्द्रभौमशुक्रलग्नेशसहितशुभग्रहाः न प्रशस्ताः । सप्तमे नित्यशुद्धः स्याद्, दशमे भौमः द्वादशस्थश्चन्द्रोऽपि निन्दितो निगदितः ।[282]

परञ्च सर्वाधिकप्रचलितानि ग्रहस्थित्याधारितानि विदुषां मतानि संगृह्य रामदैवज्ञेन शुद्धलग्नविषये यदाह तत्तु सहजतया सर्वत्र स्वीकृतम् । द्वादशस्थो शनिश्चरः, दशमस्थो भौमः, तृतीये शुक्रः, लग्ने सपापखेटश्चन्द्रः न शोभनः । षष्ठे लग्नाधिपतिश्चन्द्रशुक्राश्च, सप्तमो सकलग्रहरहितः अष्टमे लग्नेशभौमचन्द्रस्तथा शुभग्रहाः न उत्तमाः । तस्मात् तत् सर्वं विवाहलग्ननिर्धारणकाले विचारणीयम् ।

**व्यये शनिः खेऽवनिजस्तृतीये भृगुस्तनौ चन्द्रखला न शस्ताः ।**

**लग्नेट् कविग्लौश्च रिपौ मृतौ ग्लौर्लग्नेट् शुभाराश्च मदे च सर्वे ।।**[283]

- **लग्नजीवनस्य दूषितस्थितेःपरिहारः :-**

तत्र विवाहलग्ने केचनग्रहाणां दूषितस्थाने संस्थितिः निन्दितत्वादपि तत्परिहारप्राप्ते तल्लग्नं विवाहदिवसे गृह्यते । यथा- उद्वाहलग्नावासरे यदि चन्द्रः नीचराशौ, **नीचनवांशे** वा स्थिते सति षष्ठे, अष्टमे द्वादशे वा गतः स्युः तदा निश्चयेन दोषो न विद्यते ।

---

[282]मुहूर्तगणपतिः १५/२१८-२२०

[283]मुहूर्तचिन्तामणिः ६/८६

तत्प्रकारेण शुक्रः तृतीयस्थो षष्ठस्थो वा शत्रुराशिगतः अथवा नीचराशिगतः भवेत्तदा भावाज्जन्यदोषो न भवति । अन्यच्च अष्टमभावस्थो भौमः यदि नीचभवने, शत्रुगृहे अथवा सूर्ययुते अस्तङ्गते स्यात्तर्हि अष्टमभावस्य भौमदोषो न विद्यते ।

## ५.२१ विवाहे त्रिबलशुद्धिः

वरकन्ययोः विवाहवयनिर्धारिते ग्रहगोचरीयशुभाप्तये अनिष्टपरिहाराय च नवांशं विहाय गुरुसूर्यचन्द्राणां बलज्ञानमपेक्षते । तदाधारेण ग्रहगुचरशुद्धिः अर्थात् मासदिवसादिं संशोध्य शुद्धकालः निर्धार्यते, तत्र स्त्रियः गुरुबलं, वरस्य च सूर्यबलम्, उभयोः चन्द्रबलं विचारणीयं भवति । अतः यूनोः गुर्वर्कशुद्धिः विवाहे अत्यावश्यकी, तदभावे यत्नेन पूजां कारयेद् । उभयोः स्त्रीपुंसयोश्चन्द्रः विषुद्धितो विवाहशुभदः । अतः प्राप्तकाले त्रिबलशुद्धिः विचारणीया । उक्तञ्च-

**स्त्रीणां गुरुबलं पुरुषाणां रवेर्बलम् ।**

**तयोश्चन्द्रबलं श्रेष्ठमिति गर्गेण भाषितम् ।।**[284]

### ५.२१.१ गुरुबलम्

कन्याजन्मराशितः द्वितीयपञ्चमसप्तमनवैकादशेषु स्थानेषु गोचरस्थो गुरः श्रेष्ठः, प्रथमतृतीयषड्दशमस्थो पूज्यः, शेषेषु चतुर्थाष्टान्त्यस्थानेषु गते सति निन्द्यः । तत्र द्वित्रिचतुर्गुणपूजाविधानेनापि निन्द्यो निषिद्ध इत्यर्थः ।[285]

### परिहारः

विविधाचार्याणाम्मते द्वदशाष्टमचतुर्थेषु निन्द्यस्थानेषु अपि स्थितो बृहस्पतिः शुभदः । किन्तु यदि गोचरकाले स्वोच्चकर्कराशौ, निजधनुमीनराशयोः,

---

[284]बृहद् दैवज्ञ रत्नम् ७१/५२१

[285]मु. चि. ५/४६

सिंहवर्जये मेषवृश्चिकमित्रगृहे अथवा अन्यस्मिन् कस्मिंश्चिदपि राशौ **धनुमीननवांशे** राशिवर्गोत्तमे वा स्युस्तदा निन्द्यदोषरहितो विज्ञेयः। यथा

**स्वोच्चे स्वभे स्वमित्रे वा स्वांशे वर्गोत्तमे गुरुः।**

**रिःफाष्टतुर्यगोऽपीष्टो नीचारिस्थः शुभोऽप्यसत् ।।**[286]

अर्थात् स्वोच्चराशौ, स्वमित्रगृहे, स्वनवांशे च गुरः जन्मसमये अशुभो भवेत् तदापि शुभफलमेव ददाति। किन्तु यदि स एव गुरुः नीचराशौ शत्रुगृहे वा स्यात्तदा शुभस्थानीयगुरुरपि अशुभं फलं ददाति।

**वटुकन्याजन्मराशे स्त्रिकोणायद्विसप्तगः**

**श्रेष्ठो गुरुः खषट्त्रयाद्ये पूजयाऽन्यत्र निन्दितः ।।**

अर्थात् जातकस्य कन्यायाश्च जन्मराशितः २,५,७,९,११ स्थानेषु स्थितः गुरुः शुभो भवति तथा ३,६,९,१० स्थानेषु तिष्ठेत् तदा शान्तिः विधेया, १,४,८,१२ स्थानेषु स्थितो गुरुः अशुभः कथितः।

### ५.२१.२ सूर्यबलम्

गोचरीयसूर्यः विवाहकाले वरस्य जन्मराशितः उपचयस्थानस्थः श्रेष्ठः, प्रथमद्वितीयपञ्चमसप्तमनवमराशिषु स्थितो मध्यमः, चतुर्थाष्टमद्वादषेषु स्थितः रविः विवाहे अशुभत्वाद्वर्ज्यो भवति। उद्वाहे गोचरीयसूर्यबलं विज्ञाय वरस्य जन्मराशितः द्वितीयसप्तमनवमस्थानेषु स्थितस्सूर्यः मध्यमत्वात्पूज्यः, तत्रापि

[286]मुहूर्तचिन्तामणिः, पीयुषधारा टीका, ६/१२

पूजाविधानेन स्वनुष्ठितेन विवाहे सूर्यः शुभप्रदः, चतुर्थद्वादशस्थे सति सूर्ये द्विगुणपूजया, अष्टमस्थे सूर्ये त्रिगुणपूजया विवाहे ग्राह्यः । यथा-

**जन्मराशेस्त्रिषष्टायदशमेषु रविः शुभः ।**

**पश्चात् त्रयोदशांशेभ्यो विपश्चनवमेष्वपतिः ।।**

अर्थात् जन्म राशितः ३,६,१०,११ स्थानेषु सूर्यः शुभो भवति । यदि सूर्यः १३० अंशादधिको भवेत् तदा २,५,९ राशीषु शुभो भवति ।

**मध्यः पञ्चमाद्विः सप्तनवमः पूजयोत्तमः ।**

**द्विरर्च्यो द्वादशस्तुर्योऽथाष्टमस्त्रिगुनार्चनात् ।।**[287]

## ५.२१.३ चन्द्रबलम्

विवाहे वरकन्ययोः उभयोश्चन्द्रबलं विज्ञेयम् । जन्मराशितः चतुर्थाष्टमनवमद्वादशेषु स्थितश्चन्द्रः गोरमृत्युभयविपत्तयश्च क्रमशः ददाति अन्यत्रस्थ शुभदरिति । अन्यच्च अष्टमस्थश्चन्द्रो वैधव्यबन्धनकारकश्च, द्वितीये चतुर्थस्थे दुर्भाग्यदुःखप्रदः, नवमे क्षुधाकासधनहानिप्रदः, पञ्चमस्थे बन्ध्यत्वबन्धनकारी च ज्ञेयः। यथा-

**वैधव्यबन्धनकरौ निधनप्रयातौ दौर्भाग्यदुःखजनकु द्विचतुर्थसंस्थौ ।**

**क्षुत्कासदौ नवमगौ धनहानिदौ च वन्ध्यत्वाबन्धनकरौ सुतिरिष्टगौ च ।।**[288]

**जन्मराशेशस्त्रिषष्टाद्य सप्तमायोपचयसंस्थितः ।**

**शुद्धश्चन्द्रो द्विकोणस्थः शुक्ले चाऽन्यत्र निन्दितः ।।**

287मु. ग. १५/१०९

288राजमार्तण्डः ४३२

अर्थात् जन्मराशितः ३,६,१,७,११,१० स्थानेषु चन्द्रः शुभो भवति, २,५,९ स्थानेषु शुक्लपक्षे शुभो भवति, १,४,८,१२ स्थानेषु स्थितः चन्द्रः अशुभो भवति ।

जन्मराशितः चतुर्थाष्टमद्वादशराशिषु चन्द्रः पापफलदातृत्वेन अशुभत्वेन च न ग्राह्यः इत्येकपक्षः । द्वितीयपञ्चमनवमस्थो शुभाशुभत्वात्पूज्यः द्वितीयपक्षः अर्थात् चन्द्रशान्त्यर्थं पूजा कार्या । तत्र गोचरबलाभावे **अष्टकवर्गबलं नवांशबलंच** ज्ञात्वैव व्रतोद्वाहादिकमाहुः ।

## ५.२२ प्रसूतिकाले नवांशमहत्त्वम्

**तत्काल इन्दुसहितो द्वादशांशकोयस्तत्तुल्यराशिसहिते पुरतः शशांके ।**

**यावानुदेति दिनरात्रि समानभागस्तावद्गते दिननिशोः प्रवदन्ति जन्म ।।**

तत्काले, निषेक(प्रसूति)काले तत्कालेन्दुस्थितद्वादशांशं त्रिधाकृत्वा, प्रथमभागस्थे चन्द्रे तद् द्वादशांशराशौ चन्द्रे स्थिते प्रसवो भवति । द्वितीयभागस्थे तत् पञ्चमराशिगे जन्म, तृतीयभागगे नवमराशिगे प्रसूतिः, तमपि नवधा विभज्य नक्षत्रांशकाद् **नवांशाद्** वान्यद् । अस्मिन् पक्षे तत्तुल्यराशिपरतः इत्येव योज्यम् । अस्मिन् द्वादशांसात्मक क्षेत्रे चन्द्रे गते सति तदोत्तरस्य पश्चिमभागे चन्द्रे स्थिते जन्म वाच्यम्। परशब्देन प्राक् उच्यते । त्रिकोणेषु यत् प्रबलं तत्सहिते चन्द्र इति । दिनभागे राशिभागे वा यावान् त्रिंशद्भागः उदेति तावतीषु नाडीषु गतासु दिने रात्रौ वा जन्म वदेत् ।

ज्योतिर्विदाः गर्भसम्भवार्थं कीदृशं लग्नं भविष्यति गर्भाधानसंस्कारस्य कृते मुहूर्तं विनिश्चयेयुः इत्याचार्याह- “रविः, चन्द्रः, शुक्रः, भौमः **स्व स्व नवमांशस्थाः** स्युः अथवा नवम-पञ्चमलग्नस्थाः स्युस्तदा अपत्यं भवतीति निश्चीयन्ते ।

आधानकाले ज्योतिर्विद्भिः कीदृशः दोषः परिहर्त्तव्यः इत्येतदर्थं आचार्याह- दिवाकरात् सप्तमस्थानागौ भौम-शनैश्चरौ पुरुषस्य रोगप्रदौ, चन्द्रात् सप्तमस्थानगौ भौमशनैश्चरौ त्रियाः रोगप्रदौ, एतौ एव यदि द्वितीयद्वादशस्थौ तदा मृत्युप्रदौ भवतः।

अभीप्सितस्य पुत्रस्य पुत्र्या वा जन्म कथं भवेदिति, एतदर्थं जातकशास्त्राचार्याः आकाशीयान् अनेकान् योगान् निर्दिशन्ति । किन्तु एतस्मिन् विषये वैज्ञानिकाः किमपि निर्णायकं तत्त्वं निर्धारयितुं न क्षमन्ते । आयुर्वेदजाः इत्थं कथयन्ति यत् गर्भधारणक्षमस्वपुरुषस्य दक्षिणश्वासः प्रचलति तदा दक्षिणकुक्षात् रेतस्रावो भवति, पुत्रजन्मार्थं विधानमिदं शस्यते । कन्या जन्मार्थं वामश्वासप्रचलिते वामकुक्षात् रेतस्खलनं विधेयं भवति । किन्त्वत्र प्रश्नोऽयं समुदेति यत् कथं वीर्यस्खलनकाले दक्षिण-वामप्रष्वासयोः प्रचलनं भवेत् ? तत्रायुर्वेदजाः इत्थं कथयन्ति यत् वामपार्श्वतः शयनेन दक्षिणश्वास: प्रचलति, दक्षिणपार्श्वतः शयनेन च वामश्वासः प्रचलति । एवं श्वासनियमनं विधाय स्त्रीसङ्गमेनाभीष्टपुत्रस्य कन्यायाः वा उत्पत्तिः कर्तुं सम्भूयते ।

आधानकालात् वर्षत्रयेण वर्षद्वादशेन च संतानोत्तप्तिः भवितुमर्हति इति योगद्वयम् आचार्यैः निर्दिष्टम् । तद्यथा-

**उदयतिमृदुभांशे सप्तमस्थे च मन्दे,**

**यदि भवति निषेकः सूतिरब्दत्रयेण ।**

**शशिनि तु विधिरेष द्वादशेऽब्दे प्रकुर्यान्नि-**

**गदितमिह चिन्त्यं सूतिकालेऽपि युक्त्या ।।**[289]

**भट्टोत्पलः**[290] **–** मृदोः(सौरस्य) भांशे(निषेककाले) यस्य लग्नस्योदये (**शनैश्चरराशिनवांशके-** मृगांशके कुम्भांशके वोदयति) तथा भूते यस्मादेव लग्नांशान्मन्दे तत्काले सप्तमस्थे सति निषेकाधानं भवति, तदा धृतस्य गर्भस्याब्दत्रयेण प्रसवो वक्तव्यः । एष एव विधिर्यदा चन्द्रेण भवति तदा द्वादशेऽब्दे प्रसवं कुर्यादित्यर्थः । अर्थात् यस्य लग्नस्योदये यदा कर्कटांशकोदयो भवति, तस्माल्लग्नात् सप्तमश्चन्द्रो भवति तदा धृतस्य गर्भस्य द्वादशेऽब्दे प्रसवो वाच्यः इति।

## ५.२३ आयुर्दायेश्वपि नवांशमहत्त्वम्

---

289जीवशर्मणः मतानुसारेण उच्चस्थितग्रहस्य वर्षादि-आयुः १७/१/२२/८/३४ वर्तते, नीचस्थितग्रहास्यायुः ८/६/२६/४/४ वर्तते) मध्ये अनुपातानुसारेण स्पष्टायुसाधनं करणीयम् । यथा- सप्तदशैके द्वियमो वसवो वेदाग्नयो ग्रहेन्द्राणाम् । वर्गाद्युच्चस्थानो नीचस्थानामतीवोर्ध्वं स्यात् ।। मध्येनुपाततः स्यादानयनं शेषमान्यत् किञ्चित् । बृहज्जातकम्, वि.टी. पृ.१३६ उद्धृतः ।

290जीवशर्मणः मतानुसारेण उच्चस्थितग्रहस्य वर्षादि-आयुः १७/१/२२/८/३४ वर्तते, नीचस्थितग्रहास्यायुः ८/६/२६/४/४ वर्तते) मध्ये अनुपातानुसारेण स्पष्टायुसाधनं करणीयम् । यथा- सप्तदशैके द्वियमो वसवो वेदाग्नयो ग्रहेन्द्राणाम् । वर्गाद्युच्चस्थानो नीचस्थानामतीवोर्ध्वं स्यात् ।। मध्येनुपाततः स्यादानयनं शेषमान्यत् किञ्चित् । बृहज्जातकम्, वि.टी. पृ.१३६ उद्धृतः ।

आचार्यः जैमिनिः आह- **"आयुः पितृदिनेशाभ्याम्"** अर्थात् लग्नाष्टमेशाभ्यामुभयोः स्थिरद्विस्वभावस्थितयोः दीर्घायुः चरस्थिरयोः मध्यायुः, चरद्विस्वभावयोः आल्पायुः भवति । तत्र दीर्घायुः चतुःषष्टितः शताधिकवर्षपर्यन्तं, मध्यायुः अष्टचत्वारिंशद् वर्षतः चतुःषष्टिवर्षपर्यन्तं तथा अल्पायुः द्वात्रिंशद्वर्षतः अष्टचत्वारिंशद् वर्षपर्यन्तं भवति । किन्तु वराहमिहिराचार्येण जैमिनि-पराशरमतानि अविगणय्य यवनमतमेवोपन्यस्तम् । तत्र आयुर्दायविषये यवनमतम्[291]-

**मय-यवन-मगित्थशक्ति-पूर्वादिर्वमकरादिषु वत्सराः प्रदिष्टाः ।**

**नव-तिथि-विषयाश्विभूत-रुद्र-दश-सहिता दशभिः स्वतुङ्गेषु ॥**

मय-यवन-मगित्थशक्तिनामकैः आचार्यैः ग्रहेषु उपन्यस्तम् – तत्तु नव (९), तिथि (१५), विषय (५), अश्वि (२), भूत (५), रुद्र (११), दश (१०), एते दशसहिता क्रमात् सूर्य-चन्द्र-भौम-बुध-गुरु-शुक्र-शनीनां परमायुर्दायवर्षाणि भवन्ति । इमानि ग्रहाणां परमायुषः वर्षाणि ग्रहेषु उच्चस्थे-**उच्चनवांशस्थे**ष्वेव भवन्ति । अत्र आयुर्दाये जीवशर्म-सत्याचार्ययोर्मतेनायुर्दायः वर्णितः । तद्यथा-

**स्वमतेन किलाह जीवशर्मा ग्रहदायं परमायुषः स्वराशौ ।**

**ग्रहाभुक्त नवांशराशितुल्यं बहुसाम्यं समुपैति सत्यवाक्यम् ॥**[292]

---

[291]बृहज्जातकम्-टीकायाम्, (वराहमिहिरः) हो.विवृत्तिः. ७/१

[292]जीवशर्मणः मतानुसारेण उच्चस्थितग्रहस्य वर्षादि-आयुः १७/१/२२/८/३४ वर्तते, नीचस्थितग्रहास्यायुः ८/६/२६/४/४ वर्तते) मध्ये अनुपातानुसारेण स्पष्टायुसाधनं करणीयम् । यथा- सप्तदशैके द्वियमो वसवो वेदाग्नयो ग्रहेन्द्राणाम् । वर्गाद्युच्चस्थानो नीचस्थानामतीवोर्ध्वं स्यात् ॥ मध्येनुपाततः स्यादानयनं शेषमान्यत् किञ्चित् । बृहज्जातकम्, वि.टी. पृ.१३६ उद्धृतः ।

आचार्यजीवशर्मणा स्वमतानुसारेण परमायुः (१२० वर्षाणि तथा ५ पञ्चदिनानि) कथितानि । मतोऽयं सर्वसम्मतः नास्ति । होराविवृत्तिग्रन्थानुसारेण 'स्वमतेन' कथनस्य तात्पर्यं वर्तते यत् मतोऽयं जीवशर्मणः वर्तते नत्वन्यस्य । किन्तु सत्याचार्यस्य मतमस्ति यत् **"ग्रहभुक्तनवांशः"**अर्थात् स्वाभिष्टमतः, यः सत्याचार्यस्यास्ति । कथनस्य तात्पर्यं वर्तते यत् ग्रहः यादृशनवांशभुक्तो भवति तत् राशितुल्य ग्रहस्यायुर्दायः भवति । मतोऽयं बहुसम्मतो वर्तते । नैकैः आचार्यैः सत्याचार्यस्य मतस्य समर्थनं कृतमस्ति । उक्तञ्च सत्याचार्येण- आयुर्दायं द्विगुणितं करणीयम्, अर्थात् यः ग्रहः **वर्गोत्तमनवांशे, स्वनवांशे** वा स्वदृक्काणे स्यात् तस्यायुः द्विगुणितः भवति । यवनेश्वरमतम्- "आयूंषि राश्यंशकवारयोगात्" इति । अत्र तावत्सत्ययवनेशवरवाक्यव्याख्याने किञ्चित् प्रतिपन्नं राशेरंशकचारयोगादिति व्याचक्षते । यथा यस्मिन् राशौ ग्रहो वर्तते तत्र तेन यावन्त्या **नवांशकाभुक्ता**स्तावंत्येव वर्षाण्यायुः स ग्रहो ददाति । अत्र च व्याख्याने परमग्रहदायसाध्यमानेन वर्षाणि भवन्ति । एतच्च व्याख्यानं बादरायणादि-भिरङ्गीकृतम् । यथा बादरायणः[293] - "राश्येशकलागुणिता द्वादशनवभिर्गःअस्य भागेभ्यः द्वादशादृतावशेषेऽब्दमासदिननाडिकाः क्रमशः"। इदमाचार्यवराह-मिहिरेणाविमृश्य एव स्वल्पजातकेऽभिहितमेतदनुसारेण सत्ययवनेश्वरयोर्व्याख्यानं क्रियते ।आयूंषि राश्यंशकचारयोगादिति **राशीनवमांशकाः** राश्यंशकाः तेषु चारयोगादिति । यत्र यत्र राशौ मेषांशकस्थो ग्रहो वर्षमेकं प्रयच्छति, वृष नवांशकस्थो ग्रहो वर्षद्वयं प्रयच्छति । एवमुत्तरोत्तरांशकवृद्ध्या वर्षवृद्ध्यर्थात् द्वादशवर्षान्तमायुः यवनेश्वरसत्याचार्ययोर्मतेन भवति ।यद्यपि मय-

[293]बृहज्जातकम् ७/९, भटटोत्पलटीका- पृ. १४४

यवनाद्याचार्याणां मतानुसारेण शत्रुगृहस्थितग्रहस्य तृतीयांशहानिः, अस्तंगतस्य ग्रहस्यार्धहानिः सर्वसम्मतः वर्णितः ।

अल्पायुर्योगः-

**युग्मे नक्रांशगेसूर्ये चापे कर्कटकांशगे।**

**मीने जूकांशागे कन्ये मेषांशे स्वल्पमायुषः।।**[294]

अर्थात् जन्मकुण्डल्यां सूर्यः मिथुनराशौ मकरनवांशे च स्यात् अथवा धनुराशौ कर्कनवांशे च स्यात् अथवा कन्या राशौ मेषनवांशे च स्यात् तदा जातकः अल्पायुषो भवति । सिद्धान्तोऽयंकस्मिन्नपि लग्नस्य कृते वर्तते, इत्थं स्पष्टं यत् द्विस्वभावराशीस्थो सूर्यो आयुष्यं प्रभावितं करोति ।[295]

होराशार-ग्रन्थानुसारेण जातकस्य जीवने रोग-भय-समस्या-मृत्यु-आकस्मि-कसमयेत्यादीनांनिश्चितवर्णानि नवमांशाऽऽधारेण ज्ञातुं शक्यते । यथा- यदि जात-कस्य जन्मलग्नं निम्नाङ्कितनवांशं स्यात् तदा उपर्युक्तफलं प्राप्यते –

मेषनवांशे- १२, २५, ५०अथवा ६५ वर्षे ।२वृषभनवांशे- १०, २२, ३२अथवा ७२ वर्षे ।३मिथुननवांशे- १६, २४, ३४, ४० अथवा ६३ वर्षे । ४कर्कनवांशे- ८, १८, २१, २२, ७२ अथवा ८० वर्षे ।५सिंहनवांशे- १०, २०, ३०, ६० अथवा ६२ वर्षे। ६कन्यानवांशे- २०, ५० अथवा ६० वर्षे।८तुलानवांशे- ३, २३, २७,३८, ५४अथवा ७६ वर्षे। ८वृश्चिकनवांशे- १३, १८, २३, २८, ५५

[294]चन्द्रकला नाडी, भाग-२, प्र.-१, श्लो.-८०, पृ. ८६

[295]प्रायोगिक ज्योतिष विचार (गुजराती), लेखकः- एन.एस.शेठया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, पृ. ३५

अथवा ७० वर्षे । ९धनुनवांशे- ४, ९, १६, ३६, ४४अथवा ७२ वर्षे । १० मकरनवांशे-१९, २७, ३४, ४९, ५४ अथवा ६८ वर्षे । ११ कुम्भनवांशे- ७, १४, २०, २८, ३२अथवा६२ वर्षे । १२ मीननवांशे- १०, १२, २१, २६, ५२अथवा ६१ वर्षे । उच्यते यत्- सर्वेषां जातकानां कृते जन्मतः-८, ३२ तथा च ५९ वर्षं दुःखप्रदं भवति । किन्तु यदि उदितनवांशं वर्गोत्तमी भवेत् तदा शुभफलं तथा अशुभग्रहस्यान्तर्दशायांअशुभवाधिपतिश्च स्यात् तदा अशुभं फलं प्राप्नोति जातकः।

तद्वदेवलग्नचन्द्रिकाग्रन्थानुसारेण चन्द्रस्य विविधनवांशेषूत्पन्नजातकस्य निम्नाङ्कितवर्षे निधनं भवति ।

मेषनवांशे ८ वर्षे, वृषभनवांशे ९ वर्षे, मिथुननवांशे२४ वर्षे, कर्कनवांशे२२ वर्षे, सिंहनवांशे ५ वर्षे, कन्यानवांशे १ वर्षे, तुलानवांशे ४ वर्षे, वृश्चिकनवांशे २ वर्षे,धनुनवांशे २० वर्षे, मकरनवांशे ३८ वर्षे, कुम्भनवांशे २१ वर्षे तथा च मीननवांशे १० वर्षे मृत्युः अथवा मृत्युतुल्यकष्टं प्राप्नोति जातकः ।[296] तद्वदेव अशुभग्रहाः मेषनवांशात् कियत् स्थानपर्यन्ताः दूरे स्थिताः वर्तन्ते तत् संख्यानुसारं जातकस्य जीवने कष्टेत्यादीनां वृद्धिर्भवति। लग्नसदृशमेवान्यभावानां विचारं कृत्वा मातृ-पितृ-भ्रातृ-सन्तानादीनामपि विचारः करणीयः ।

**मेषे चापांशगे शुक्रे कुलीरे च प्रज्ञायते।**

**जीवे कुजयुते काले बहुवित्तयुतः सुखी ।।**[297]

(चन्द्रकलानाडीग्रन्थभाग-३, प्र.-२, श्लो.-३२७२, पृ. ९७)

---

296 प्रायोगिकज्योतिष विचार (गुजराती), लेखकः- एन.एम.शेठिया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, पृ. ३६

297 प्रायोगिक ज्योतिष विचार, (गुजराती), स्व.श्री एन.एम. शेठिया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, २००४, पृ. सं. ३८

अर्थात् जातकस्योत्पत्तिः कर्कलग्ने तथा च शुक्रः मेषराशौ धनुनवांशे च भवेत् तदा जातकः अतिधनवान्, सुखी च भवति । तदुपरि गुरोः भौमस्य च युतिः गोचरे भवेत् तदापि जातकः धनमवाप्नोति। कारणं यत् कर्कलग्नतः मेषराशी दशमस्थाने आगच्छति तथा च शुक्रः शुभग्रहोऽपिवर्तते एवञ्च धनुनवांशं शुक्रस्य पुष्करनवांशमस्ति अतः भौमस्य गुरोश्च गोचरयुतिकाले शुक्रः शुभप्रदाता भवति ।

## ५.२४ नवमांशदशाविचारः

एकं नवांशम्अर्थात् जीवनस्यैकवर्षम् इति गणनया जातकस्य जीवने किं भवितुं शक्यते इति ज्ञानं भवति । किन्तु कस्मिन् मासे दिने वा किं भवितुं शक्यते इति ज्ञानाय निम्नाङ्कितपद्धतेः अनुसरणं कर्त्तव्यम्। यथा-

एकं नवांशं= ३°.२०=२०० कला,=१ वर्षं=३६० दिनानि । अर्थात् यस्मिन् दिने घटना स्यात् तस्मिन् काले योगकारकग्रहः नवांशे कियदंशपर्यन्तदूरे वर्तते तदाधारेण वर्षाणि निश्चित्य अंशानां कलायां परिवर्तनं कृत्वा २०० कला आधारेण ३६० दिनानि विगणय्य मासस्य दिनस्य च ज्ञानं कर्तुं शक्यते ।

-  उदा.- श्रीमति इन्दिरागान्धी
-  ज.दि.१९-११-१९१७,
-  ज.स. २१-११,
-  मृत्युः ३१-१०-१९८४ दिल्ली

जन्मलग्नं- कर्कः, लग्ने शनिः, द्वितीये भौमः, पञ्चमभावे सूर्यः बुधः च, षष्ठभावे शुक्रः राहु च, सप्तमे चन्द्रः, लाभभावे गुरुः तथा च द्वादशे केतुः वर्तते ।

इत्थंश्रीमति इन्दीरागान्धीमहोदयायाःजन्मकालीकः बुधः तृतीयभावस्य द्वादशभावस्य चाधिपतिरस्ति अतः बुधः तस्याः मृत्यवे कारणभूतः मन्यते । तं बुधं मेषराशेः मेषनवांशतः गणनया-

बुधः ५-७-१३-१५ वर्तते, मेषनवांशतः गणनया सप्तमराशी भवति, अतः ७ ९=६३ नवांशाः भवन्ति इत्थं ६३ वर्षाणि प्राप्यन्ते । १० अंशा=३ नवांशम् अतः ३(त्रीणि) वर्षाणि एकीकृत्य ६६ वर्षाणि समायान्ति । शेषः वर्तते ३.१५ तेषां १९५ कला: भवन्ति, त्रिराशिकाधारेण-

२०० १९६ = ३५१ दिनानिअर्थात्११मासाः,२१ दिनानि भवन्ति ।

३६०

इत्थं इन्दिरागान्धीमहोदयायाः मृत्युकालेउपर्युक्तसमय एव दृश्यते अर्थात् दिनाङ्कः- ३१-१०-१९८४ तमेऽब्दे (६६ वर्षाणि, ११ मासाः तथा च २१ दिनानि व्यतीतानि, तस्मिन्काल एव) निधनं जातम्। अत्रान्तरं केवलं पञ्चविकलाया एव वर्तते ।[298] कारणं यत् बुधः तृतीयभावस्य द्वादशभावस्य च अधिपतिर्वर्तते,“अष्टमं ह्यायुषस्थानम्अष्टमादष्टमं च यत् । तयोरपि व्ययस्थानंमारकस्थानमुच्यते।।” इत्यनुसारेण संसारत्यागस्य द्वारमस्ति कालोऽयम्।

❀ ❀ ❀

298 प्रायोगिकज्योतिष विचार (गुजराती), लेखकः- एन.एम.शेठिया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, पृ. ४०